प्रायश्चित्त दीप:

६९४

नं० ६१८४
प्रायश्चित्तप्रदीप

१५३४ १०००

प्रायश्चित्तदीप

६६

प्रा॰प्र॰ श्रीगणेशायनमः अविघ्नमस्तु॥ नत्वा बोधायनाचार्यं तन्नोक्तश्रौतकर्मणां विधातिक्रमणे प्रायश्चित्तदीपः प्रकाश्यते १ श्रौते बौधायनोक्तानि
१ प्रायश्चित्तानि यानि तु ऽक्तानि सूत्रभाष्ये च वर्यगोपालसूरिणा २ यानि सोक्तानि प्रकीर्णानि तैरनुक्तानि यानि च भवत्स्वामिमतान्येषां विस्तर
त्रिर्णयं बुवे ३ पंचप्रकरणान्यत्र तेषाधानाग्निहोत्रके दर्शाद्याग्रयणा यत्र सोमश्चेति यथाक्रमं ४ अथातो मंत्रगणाम्नातानी सादि॰
अथप्राब्द्आनंतर्ये कर्माण्यभिधायानंतरं प्रायश्चित्तमभिधीयते· अतः प्राबोद्देत्वर्थः· यस्मात्कर्मणि वैगुण्ये सति प्रायश्चित्ते कृते कर्म सगु
णं भवति· अतः प्रायश्चित्तानि व्याख्यास्यामः· विहितानामकरणे ऽमथावा करणे प्रायश्चित्तं विधीयते· मंत्रगणाम्नातानि मंत्रेणाम्नाता
नि गणेनाम्नातानि कानि चिन्मंत्रेणावगम्यंते· कानि चिद्रूपेन अग्न्यसप्रतिष्ठा मनसश्चक्षुस्येवमादीनां प्रायश्चित्तत्वं मंत्रसामर्थ्येनावगम्यतेऽ
ष्वयंतमसस्पतिरित्येवमादीनां प्रायश्चित्तत्वं गणसामर्थ्यादवगम्यते· आपो विना प्रायश्चित्तं संधानं तद्र्व्यते· सर्वजप्रायश्चित्तहोमेषु स्मार्तवदा
ज्यसंस्कारं कुर्यात्· तत्रक्रमः· गार्हपत्यादुत्तरतो दर्भेषु आज्यस्थालीं स्रुवं जुहूं प्रोक्षणीपात्रं चासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्य पात्राणि प्रो
क्ष्याग्निरेपवित्रमाज्यस्थाल्यामाज्यं निरुप्योदीचोंगारान्निरूह्य तेषु तत्स्वाते षधिश्रित्याभिद्योतनेनाभिद्योत्य व्देदर्भाग्रे प्रच्छिद्य प्रक्षाल्य
प्रत्यस्य पुनरभिद्योत्य पर्यग्निकृत्वा वर्त्मकुर्वन्नुदगुद्वास्य प्रत्यूह्यांगारानुदीचीनाग्राभ्यां पुनराहारं आज्यं त्रिरुत्पूय विलाप्य पवित्रे अद्भिः संसृ एम·
ष्टाग्नावनुमहत्य स्रुवं जुहूं च निष्टप्य दर्भैः संमृज्याद्भिः संप्रोक्ष्य पुनर्निष्टप्य दर्भानग्नौ प्रहरति एवं सर्वत्र एवाज्यसंस्कारः स्मार्तवद्भवति· सर्वत्रा १

दिष्टस्थानेषु तत्र तत्र जुहुयात् । अधिदेवने जुहोति । रथमुखे जुहोति चतुष्पथे जुहोति । आव्रश्चने जुहोति औदुंबर्यां जुहोति उत्तपनीये जुहो
ति आग्नीध्रीये जुहोति गार्हपत्ये जुहोतीत्यादीन्यादिष्टस्थानानि । अनादिष्टे आहवनीय एव होतव्यं । सर्वत्र आदिष्टे कर्तरि तेन तेन होतव्यं नेष्टो
जुहोति प्रतिप्रस्थाता जुहोतीत्येवमादीन्यादिष्टकर्तृकाणि । अनादिष्टे कर्तर्यध्वर्युरेव कर्ता प्रतीयात् । पत्र पत्र पात्रं निर्दिष्टं तत्र तत्र तेनैव कुर्या
त् । अंजलिना जुहोति । शूर्पेण जुहोति कृष्णाजिनपुटेन जुहोति मध्यमेन पर्णेन जुहोति अर्कपर्णेन जुहोति स्रुवेण जुहोति स्फ्यवपा जुहोती
त्येवमादीन्यादिष्टपात्राणि । अनादिष्टे तु जुह्वैव जुहुयात् । पत्र पत्र ग्रहणं संख्योक्तिस्तत्र तत्रोक्तग्रहणसंख्यापादापजुहुयात् । चतुर्गृहीतेन जुहो
ति पंचगृहीतेन जुहोतीत्यादीन्युक्तग्रहणसंख्यानि । अनादिष्टग्रहणसंख्याने सकृद्ग्रहणमिष्यते ॥ अथाधानप्रथमे प्रयोगे प्रक्रांते संक
ल्पानंतरं पत्न्यामनालंभुकायां प्रक्रांतं प्रयोगमुत्सृज्यादित आरंभकालांतरे आदधीत । अग्न्याधानदक्षिणादानात्पूर्वं पत्न्याः कदाचनालंभु
का भवति तदा प्रयोगमुत्सृज्य आदित आरंभकालांतरे आदधीत । दक्षिणादानात्परतश्चेत्सेष्टिकमाधानं समापयेत् । बहुपत्नीकस्या
पि संकल्पादूर्ध्वं दक्षिणादानात्पूर्वं पत्न्याः कस्यांवानालंभुकायां प्रयोगमुत्सृज्यादित आरंभकालांतरे आदधीत दक्षिणायाः ऊर्ध्वं चेदन्त
र्याः समापनं । संकल्पप्रभृति पूर्णाहुतेः पूर्वं अनालंभुकायां उत्सृज्य कालांतरे आदधीत । पूर्णाहुतेः प्रक्रांते नालंभुका चेदपहध्य समापयेदिति
कश्चिदाह । द्वितीयाधाने संकल्पात्परतो नालंभुकायामपहत्यैव समापयेत् । आधानसंकल्पात्प्रागेनालंभुकामेकामपि विहायाधानं संकल्पं न कु

प्रा·टी० र्यात्। होमपूर्वाधाने इष्टिपूर्वाधाने च दक्षिणापार्श्वे ऽर्ध्वे अनालंभुकायामपरुध्य सेष्टिकमाधानं समापयेत्। अग्निहोत्रारंभं दर्शपूर्णमासारंभं वा
२ न कुर्यात्। चतुर्थेहनि स्नातायां तया सहाग्निहोत्रारंभं दर्शपूर्णमासारंभं वा कुर्यात्। शुद्धिकालपर्यंतं अग्निगुप्त्यर्थं त्वग्निहोत्रापि हापं प्रातर्जुहुया
३ दिति केचिदाहुः स्नातायामग्निहोत्रारंभं कुर्वन् कालातिक्रमप्रायश्चित्तं मनस्वतीं कृत्वाग्निहोत्रारंभं कुर्यात्। इष्टिपूर्वाधाने कालातिक्रमप्राय
श्चित्तार्थमन्वारंभेष्टिपूर्वकं पाथिकृतीमिष्टिं कृत्वानंतरे पर्वणि दर्शपूर्णमासारंभं कुर्यात्। आधानादौ अरण्यादीन्संभारान्संभृत्य साधान
संकल्पं कुर्यात्। अश्वत्थः शमीगर्भात् केवलाश्वत्थाद्वारणीं परिगृह्णीयात्। प्रागुदग्गतामुदग्गतां वाश्वत्थशाखां पर्वकाले छित्त्वा प्रागुद
गग्रां निपात्य चतुर्विंशत्यंगुलप्रमाणां वा छित्त्वा समं पाटयित्वोपरिभागमुत्तरारणिमधोभागमधरारणिं कुर्यात्। चतुर्विंशत्यंगुलायामां द्वा
दशांगुलविस्तारां चतुरंगुलोत्सेधामुत्तरारणिमधरारणिं च कुर्यात्। अपि वा षोडशांगुलायामां द्वादशांगुलविस्तारां चतुरंगुलोत्सेधामुत्त
रारणिमधरारणिं च कुर्यात्। अपि वा प्रादेशमात्रीं सर्वतः समां चतुरंगुलोत्सेधामेवाधरारणिमुत्तरारणिं च कुर्यात्। अधरारण्या मूलभा
गेंगुलद्वयं मुक्त्वा पार्श्वयोस्त्रीणि त्रीण्यंगुलीनि मुक्त्वांतरा देवयोनिस्तन्मध्ये कृताशनैस्तत्र मंथनं कुर्यात्। उत्तरारण्या मूलभागे द्व्यंगुल
प्रमाणं षडंगुलप्रमाणं वा मंथनशकलं छित्त्वा तीक्ष्णं कृत्वा षोडशांगुलमात्रं खादिरं मंथनदंडं सुषिरे मंथनशकलं मूलतः कील एम·
यित्वा मंथनप्रदेशे निधाय खादिरेण षोडशांगुलप्रमाणेनापकीलितेन प्रमंथदंडेनोपरि पीडयित्वा मंथेत्। अरणिः कृमिदष्टा चे २

स्तत्र हानिदा॰ ग्रंथिपृक्ता चेत्पत्नीहानिदा॰ अपादित्ता नेदुःखदा॰ सुषिरा चेद्यजमानहानिदा भवति॰ अतः सुषिरादिदोषरहिते पूर्वोक्तलक्षणे
अरणी गृह्णीयात्॰ उक्तदोषादीनां संभारणानां छेदे दोहे ऽमेध्यादिभिरुपघाते एकदेशस्य क्षतस्य वा नाशे तज्जातीयं तत्परिमाणं तद्रूपं तद्वर्णं
तन्मंत्रेण गृह्णीयात्॰ तत्स्थाने स्यादपि त्वा संस्कृत्य त्वमग्ने अपासि प्रजापत इत्येताभ्यां प्रलोदनार्थेग्नौ स्रुवाहुती जुहुयात्॰ एकैकस्य
नाशे सर्वेषां नाशे वा सर्वमंत्रेण संभृत्यैते एव स्रुवाहुती जुहुयात्॰ गोपितृयज्ञार्थाग्निं लौकिकात्प्रतिमंथनं मथित्वा दक्षिणामापतनेनिद
ध्यात्॰ अथ नाश्रोत्रियागोरहाहृत्य निदध्यात्॰ निहितमग्निं परिषिच्य परिस्तीर्याज्यं संस्कृत्य स्रुवेणाज्यमग्नौ समिधमाधायाग्निसंस्का
रार्थं पुनस्त्वेति स्रुवाहुतिं जुहुयात्॰ सर्वत्र होमेषु पर्युक्षणं परिस्तरणमग्नौ समिदाधानं आज्यसंस्कारः पात्रसंस्कार इत्येतत्तंत्रं पंचकं होमं
कुर्यात्॰ नासमित्कोजुहुयाद् असमित्कोजुहुयाद्यथा जिह्मं दद्यात्तादृक्तत्स्यात्समिद्धत्येव हातव्यमिति कर्मांतवचनात्स[illegible]मिधमाधायै
व होतव्यं सर्वत्रोपसमाधायादोतव्यमित्यापस्तंबवचनादाज्यालाभे व होतव्यं॰ सर्वेषु होमेषु अस्मापतनानि पुष्पैरलंकुर्यात्॰ तत्र शुक्लपुष्पै
रलंकरणं मुख्यं तदभावे जपापुष्पादयस्तानि वर्जयेत्तामसैः पुष्पैरलंकुर्यात्॰ गोपितृयज्ञार्थाग्नावुद्धृते पाप्रकृतिस्तत आहृत्याह
तीर्यस्तामः समस्ता अग्निं जुहुयात्॰ अतिप्रणीतोल्मुकनाशे तत एव पुनरुल्मुकमाहृत्योल्मुकाग्नौ दाक्षिणाग्नौ च अस्तसमस्त्याहुती
र्जुहुयात्॰ गोपितृयज्ञार्थसंभारणानां नाशे पुनरहृत्य गोपितृयज्ञार्थाग्नौ त्वमग्ने अपासि प्रजापत इति द्वे स्रुवाहुती जुहुयात्॰ अग्नौ

प्रा॰दी॰ दनार्थस्थालीभेदः भिन्नो घर्मो द्रुतिमग्नोस्थाल्यामभिमंत्र्य घर्मो देवानिसमांस्थालीं निधाय भग्नामप्सु प्रक्षिप्य सर्वप्रायश्चित्तं ब्रह्मौदना
३ नौ जुहुयात् ब्रह्मौदनाग्निः सर्वौषधहोमात्पूर्वं अनुगतश्चेत्तल्लौकिकाम्मथ्याद्य पूर्वमाहृतश्चेत्तत एव पुनरुत्पाद्य याप्याश्चाग्नेरिसेकपालु
3 चाहुत्वा पुनः संधाय सर्वौषधहोमादि कुर्यात् पूर्वमौपासनाग्निरर्धमाहृतोऽनष्टश्चेत्पुनरौपासनार्धमानीय सर्वप्रायश्चित्तं हुत्वा सं
र्वौषधहोमादि कुर्यात् सर्वौषधहोमादूर्ध्वं अग्न्यावनुगते पूर्ववदुत्पाद्य संधाय सर्वौषधहोमादि कुर्यात् ब्रह्मौदनं पचेत् ब्रह्मौद
नपाकादूर्ध्वं समारोपणात्पूर्वं अनुगते पूर्ववदुत्पाद्य सर्वौषधहोमादि कृत्वा ब्रह्मौदनपाकादि वरदानांतं कृत्वा [illegible] व समारोपणा
दि कुर्यात् संवत्सरादि पक्षेषु ब्रह्मौदनाग्नौ बहुकालत्वनष्टे पूर्ववदग्निमुत्पाद्य सर्वौषधादि पुनः पुनर्ब्रह्मौदनं पचेत् मंथनादनंत
रं जातोऽग्निरनुगतश्चेत्प्रयोगमुत्सृज्यादित आरभ्य कालांतरे आदधीत गार्हपत्याधानात्पूर्वं सर्पा दपेत इति प्रयोगमुत्सृज्य कालांतर
आदधीत तनुहविषां समासेः पूर्वं गार्हपत्यनष्टे प्रयोगमुत्सृज्य आदित धीत दक्षिणाग्न्याहवनीये वाधानमिति पूर्णाहुतेः पूर्वं अ
नुगतेपि प्रयोग॰धीत पूर्णाहुतेरूर्ध्वं तनुहविषां समासेः पूर्वं दक्षिणाग्न्याहवनीययोरनुगमने गार्हपत्यात्तौ स्वैस्वैर्मंत्रैराधाय व्या
हृतिभिः सर्वौषधहोमादि विएजक्रमो पस्थानांतं कुर्यात् आहवनीय एव पूर्णाहुतिं तन्त्रेऽग्निहोत्रहोमं च कुर्यात् अथाधाना एम॰
ऽपरि समासेः पूर्वं दक्षिणाग्न्याहवनीययोरनुगमने पूर्ववदाधाय पुनरन्वाधायं आहुतीभिरुपतिष्ठेत आधानप्रभृत्या समासेः स ३

भावे एतयोर्नाशे आहवनीयात्पूर्ववदाधाय सर्वौषधाद्युपस्थानान्तं कुर्यात्। समारोपणानन्तरमरण्योर्नाशे उपघाते अपहारे वा एतत्
प्रयोगमुत्सृज्यादित आरम्भकालान्तर आदधीत। पूर्णाहुतेः पूर्वं पयसः कस्यांगस्याकरणे पूर्णाहुत्यनन्तरं त्वं नो अग्ने स त्वं नो अग्न इत्ये
ताभ्यामाहवनीये द्वे स्रुवाहुती हुत्वा यजुर्गेषु प्रायश्चित्तं भुवः स्वाहेति दक्षिणाग्नौ जुहुयात्। सामगेषु सुवरित्याहवनीये जुहुयात्। आ
धानसंकल्पादूर्ध्वं यजमानस्य वरणादूर्ध्वमृत्विजां च जाताद्याशौचसंभवे स्नात्वा प्रक्रान्तं कर्म समापयेत्। एवं सर्वत्र। वृतानामृत्वि
जां यजमानस्य वा स्वप्ने रेतोविसर्गे इमं मे वरुण तत्त्वा यामीत्येताभ्यां द्वे स्रुवाहुती हुत्वा पुनर्मामैत्विन्द्रियमित्यनुवाकं जपेत्। यजमा
नः स्वदारागमनेऽग्नये व्रतपतय इष्टिं कुर्यात्। आहिताग्निर्यदा कदा वा अबुद्धिपूर्वकमन्यस्त्रीगमने द्रागतम्भ्रते इष्टिं विधाय एतत्सूक्तम
पि प्रायश्चित्तं कुर्यात्। आहवनीयाधानकाले मेघादिना सूर्यो नाविर्भवति चेत् उद्वयं तमसस्परि उदु त्यं चित्रमिति तिसृभिः स्रुवाहु
तीर्जुहुयात्। आधानयजमानेऽह्नयोर्मध्ये सूर्याचन्द्रमसोर्ग्रहणोपेते तदेव प्रायश्चित्तं। उक्तानां दक्षिणानामभावे वासांस्येतावन्ति दद्या
त्। मंथन्यौ ओदनान्वैतावतो दद्यात्। क्षीरमिश्रा आज्यमिश्रा अपावः सक्तवो मंथः एकां गामपि दक्षिणां दद्यात्। अग्न्याधानं स
र्वथा कुर्यात्। नेत्येवानाहिताग्निः स्यादित्याचार्यवचनात्। नानाहिताग्निर्क्रियेतेति श्रुचतिवाक्याच्च। एतद्द्रव्यहीनकल्पेन कु
र्यात्। तथा च मनुः। हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदमिति। आधाने दक्षिणार्थमश्वं दद्यात्। अश्वं दत्वा दाताश्वप्रतिग्रहे

प्रा॰दी॰ ष्टिं कुर्यात् इति केषांचिन्मतं। प्रतिग्रहीतुरित्यन्येषां मतं। प्रयोगः अश्वप्रतिग्रहे इष्ट्यापत्स्य इति संकल्पः वरुणाय चतुःकपालं पुरो
४ डाशं निर्वपेत्। इमं मे वरुण तत्त्वा यामीति च याज्यानुवाक्ये। वरुणस्य धर्मभाग्भूयासं। पुनरालंभवर्जं संतिष्ठते। एकाश्वप्रतिग्रही
५ यात् सौर्यमेककपालं अनुनिर्वपेदिति। अपराश्वप्रतिग्रहार्थमिष्ट्यापत्स्य इति संकल्पः वरुणाय चतुःकपालं पुरोडाशं निरुप्य सौ
र्यमेककपालमनु निर्वपेत्। उदुत्यं चित्रमिति याज्यानुवाक्ये। सूर्यस्याहं सुदृशीकः। अतः परं यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारु
णांश्चतुःकपालान् निरुप्यैकमतिरिक्तं निर्वपेत्। एवमश्वप्रतिग्रहे इष्टिं समाप्यावभृथे इष्टिं कुर्यात्। मुष्टिं वेदं च हुत्वा वरुणायै
ककपालं हुत्वाऽवभृथेष्टिं कृत्वा पुनरेत्यापोनप्त्रीयं चरुं निर्वपेत्। इष्ट्यापत्स्य इति संकल्पः अपां नप्त्रे जुष्टं निर्वपामीति चरुं
निर्वपेत्। अपां नपादाह्यस्थादुपस्थं [illegible] समन्यापंतीति याज्यानुवाक्ये अपां नपादहं प्रजया चेति। पुनरालंभवर्जं संतिष्ठते। आधाना
दनंतरं दैवान्मानुषाद्वा प्रतिबंधाद्वा बलवद्विरोधतो वा स्वकाले दर्शपूर्णमासावनारब्धौ चेत्तदा प्राप्ते विरोधे आगामिन्यां पौर्णमा
स्यां विच्छेदप्रायश्चित्तार्थं अन्वारंभणीयां कृत्वा विच्छिन्नेष्टिं कृत्वा दर्शपूर्णमासार्थमन्वारंभणीयां कृत्वा पौर्णमासेन यजेत। एवमाधानानंतरं स्व
कालेऽयने संवत्सरे वा प्रथमपर्यायारंभे पोविच्छिन्नेष्टिं कृत्वा पशुना यजेत। प्रथमाग्रयणस्य पारदृष्टये विच्छिन्नेष्टिं कृत्वाऽऽ एम॰
ग्रयणेन यजेत। अनारब्धानां दर्शपूर्णमासाग्रयणपशूनां प्राप्तिस्तंत्रैकस्मिन् [illegible] कं इति द्वैधे दर्शिनं प्रथमे दर्शपत्या रजस्वला पां ४

पिंडपितृयज्ञारंभं न कुर्यात् । पिंडपितृयज्ञप्रायश्चित्तार्थं पाणिसंमर्षणात्सर्वं समिष्टयजुषः पूर्वं वा दक्षिणार्थाहवनीये सप्तहोतारं जुहुया
त् । अनंतरं पिंडपितृयज्ञारंभं कुर्यात् । अग्निहोत्रारंभकाले अग्निहोत्रमनारब्धं चेत्तदा परेद्युः सायंकाले सप्तहोतारं मनसा हुत्वा चतुर्होत्राग्नि
होत्रारंभं कुर्यात् इति प्रायश्चित्तप्रदीपे आधानप्रकरणं समाप्तं ॥ अथाग्निहोत्रप्रायश्चित्तमुच्यते । तत्र प्रथमम् अनुगमनप्रायश्चित्तमुच्यते । क
र्मकाले गार्हपत्य उद्वाते यजमानपत्नीभ्यामन्वारब्धोऽध्वर्युः प्रोषिते यजमाने पत्न्यान्वारब्धः पत्न्यामनालंभुकायामध्वर्युः अप्रोषिते यजमा
नो गार्हपत्यायतने अयं ते योनिरृत्विय इति भस्मनारणी संस्पर्शनं समारोपणं । अदृष्टरूपोऽग्निर्विद्यातीति बुध्वा भस्मसंस्पर्शनं समारोपणं र
वं समारोप्य मंथेत् । इतः प्रथमेति मंथते अग्निरुद्वातः स्वे तत्समारोपणमंत्रं जप्त्वा पुनर्मंथेत् । मथ्यमानाग्निर्यदि न जायेत विहरणकाले अप्रा
प्तस्तदा यत्रायं प्रयोत्तत आहर स होतन्नमिति वचनात् । लौकिकमग्निमाहृत्य गार्हपत्यायतने निधाय तत्रैवारणी निधायमंत्रेण गार्हप
त्यादग्निद्वयं विहृत्य तेष्वग्निहोत्रं जुहुयात् । यदि मंथनस्यावसरेण विद्यते तदा मंथनारंभं कृत्वा लौकिकेऽग्नौ अग्निहोत्रं जुहुयात् । होमानंत
रमाग्नीनुत्सृजेत् । लौकिकेऽग्निहोत्रहोमे उपप्रयंतो अध्वरमित्युपस्थानं न कुर्यात् । लौकिकाग्निहोमदिने नान्यत्र तद्वदोहिसादीनि व्रतानि क
र्तव्यानि दर्शपूर्णमासौ लौकिकेऽग्नौ कुर्याच्चेत् तनुमस्पाहृत्वा पुनर्यजेत । होमार्थं विहृतेषु यद्व्रतं यजमानस्य लौकिके तत्र विद्यते । लौकिके आ
वग्निहोत्रहोमे त्रयोऽधिकारिणः नष्टश्चेदग्निरेकः सर्वस्य प्रयाणशीलो यः अग्नीनां रक्षणे मंथने वाऽसमर्थोऽन्यः एते त्रयोऽपि समारूढाग्नयः अ

प्रा॰ ही॰ ग्निषु समारूढेषु अनुद्धरणप्रायश्चित्तं नेष्यते लौकिकमप्यलभ्यमानः छागस्य दक्षिणे कर्णे जुहोति छागमांसं न भक्षयेत् छागाभा
५ वे ब्राह्मणस्य दक्षिणे हस्ते होतव्यं गृहमागतं ब्राह्मणमशनादिभिः पूजयेत् ब्राह्मणाभावे दर्भस्तम्बे होतव्यं दर्भैरासनादीनि न कुर्यात्
५ दर्भाभावे अप्सु होतव्यं अप्रांगर्हां न कुर्यात् एतानि व्रतानि संवत्सरपर्यंतं यावज्जीवं वा यदि बहुकृत्वो लौकिकेग्नौ आलस्यादिनाग्निहोत्रे हुते म
नस्वतीतं तु मतीष्टिः प्रायश्चित्तं इष्ट्यापत्स्ये इति संकल्प्य अग्न्यन्वाधानादि अग्नये तंतुमते अष्टाकपालं पुरोडाशं निर्वपेत् त्वं नस्तंतुः
स्त्वं पंकृपवान इति याज्यानुवाक्ये अग्ने तंतुमतो हः अत्रादः एवं लौकिके तौ अग्निहोत्रे हुत्वा मंथेत् इतः प्रथमं जज्ञे अग्निरित्यादि
ना जातमग्निमुपतिष्ठते इषे रय्यै रमस्वेति तं प्रज्वलयेत् सारस्वतौ त्वोत्सावितिः एतत्त्रयं मंथनस्याहुः उच्यते मथितमग्निं गार्हप
त्यायतने निधाय दक्षिणाग्निमाहवनीयं च प्रणीय पूर्ववदाज्यं संस्कृत्य चतुर्गृहीतं गृहीत्वाहवनीये मनस्वतीं हुत्वा गार्हपत्ये सर्वहो
तृभिः प्रत्येकं चतुर्गृहीतानि जुहोति वित्तिः स्रुगिति दशहोता चतुर्होता पृथिवी होता पंचहोता अग्निर्होता षड्ढोता वाग्घोता सप्त
होता महाहविर्होता एतैर्होतृभिः सग्रहैः हुत्वा पुनश्चतुर्गृहीतेन दक्षिण एनौ चतुर्होतारं पुनश्चतुर्गृहीतेनाहवनीये पंचहोता
रं हुत्वा पुनश्चतुर्गृहीतेन यजमानेनान्वारब्ध आहवनीये दशहोतारं मनसानुद्रवन् जुहुयात् सर्वत्र होतृमंत्राः सग्रहा अग्रहा वा अग्र एम॰
हपक्षे स्वाहांतैर्होमः ग्रहाश्च दशहोतुर्वा वस्पते विधे नामन् इति चतुर्होतुर्वाचस्पते वाचो वीर्येणेति पंचहोतुः सोमः सोमस्य पु ५

रोगादिति षड्ढोतुः भूर्भुवः सुवरिति सप्तहोतुः वाचस्पते हृद्विधे नामन्निति स्रुर्पेत्तिति षड्ढोता प्राप्याश्रितेनेष्यते सभ्यावसथ्ययो
रेकाकस्मिन्होतृ जुहुयात् इष्टा होतृहोमानंतरं प्रद दक्षिणमाहृत्य गार्हपत्ये दशात्मकं संश्रितब्राह्मणएकहोतेसनुवाकोऽग्नेदशभि
र्मंत्रैर्दशाप्नुवाहुतीर्जुहुयात् इदं गार्हपत्ये सर्वहोमादिदशात्मकहोमांतं सर्वाग्निना प्राप्याश्रितं दाक्षिणाग्निरनुगतश्चेद्गार्हपत्या
त्प्रणीय दक्षिणाग्नौ चतुर्होतारं हुत्वा गार्हपत्ये दशात्मकं जुहुयात् आहवनीयोऽनुगतश्चेत्प्रणीय आहवनीये पंचहोतारं गार्ह
पत्ये दशात्मकं जुहुयात् सभ्यावसथ्ययोर्नाशे आहवनीयात्तौ प्रणीय सर्वान्होतॄन् उभयोर्हुत्वाहवनीये दशात्मकं जुहुयात् द
क्षिणाग्नेर्ग्रामनिर्मथ्ययोनिपक्षे स्वयोनितउत्पाद्य दक्षिणाग्नौ चतुर्होतारं जुहुयात् गार्हपत्ये तु दशात्मकहोमः सभ्यावसथ्ययोर्ग्रा
मनिर्मंथ्ययोनिपक्षे योनितउत्पाद्य तयोः सर्वान्होतॄन्जुहुयात् आहवनीये तु दशात्मकहोमः विहरणानंतरं गार्हपत्यस्य ह्यातेआ
हवनीयं दक्षिणाग्निं चोद्धाप्य गार्हपत्यापतनेमंत्रेण भस्मनारणी संस्पृश्येतः प्रथममित्यादिना मंथनादि हुत्वा गार्हपत्ये निधा
य तस्माद्दक्षिणाग्निं आहवनीयं च प्रणीयाज्यं संस्कृत्याहवनीये मनस्वतीं हुत्वा गार्हपत्ये सर्वान्होतॄन्हुत्वाहवनीये दशहोतारं हुत्वा दक्षिणा
ग्नौ चतुर्होतारं आहवनीये पंचहोतारं गार्हपत्ये दशात्मकं जुहुयात् दाक्षिणाग्निनाशे गार्हपत्यात्प्रणीय दक्षिणाग्नौ चतुर्होतारं हु
त्वा गार्हपत्ये दशात्मकं दक्षिणाग्नेर्ग्रामनिर्मंथ्ययोनिपक्षे योनितउत्पाद्य दक्षिणाग्नौ चतुर्होतारं जुहुयात् गार्हपत्ये न दशात्मकहोमः

प्रा॰दी॰ विहरणानंतरं होमात्पूर्वं आहवनीयोनुगतश्चेद्येभ्यो द्राहम्यकुद्धाये तेभ्यो मंथेत तज्जातीयारणीभ्यां वा भस्मसमारोप्येतः प्रथ
६ ममित्सादिना मंथेत तज्जातीयारण्यभावे नित्यारणीभ्यां मंत्रेण भस्मसमारोप्य मंथनाहृतामथित्वाहवनीयायतने निधाय मन
6 स्वतीं कृत्वा पंचहोतारं जुहुयात् पश्चाद्धुतेग्निहोत्रे आहवनीयोनुगते गार्हपत्यात्प्रणीयेतः प्रथममित्सादिना मंत्रत्रयं जपित्वाह
वनीये पंचहोतारं हुत्वा गार्हपत्ये दग्धात्मकं जुहुयात् मंथनपक्षे गार्हपत्यात्प्रणयनपक्षे चाहवनीयानुगतिप्रायश्चित्तार्थं ज्यो
तिष्मतीष्टिं कुर्यात् इष्ट्यापत्स्ये इति संकल्पः अन्वाधानादि अग्नये ज्योतिष्मते ष्टाकपालं निर्वपेत् उदग्नेश्रुचयस्तव विज्योति
षेति याज्यानुवाक्ये अग्नेर्ज्योतिष्मतो हं पत्राद् इदं इष्टप्राकृतौ याज्यानुवाक्याभ्यां पूर्णाहुतिं जुहुयात् पश्चात् अग्नये ज्योतिष्मते स्वाहेति
स्रुवाहुतिं जुहुयात् ततस्तिष्ठे वाग्निहोत्रं जुहुयात् सभ्यावसथ्ययोर्नाशे आहवनीयात्तौ प्रणीय तयोरेकैकस्मिन्सर्वान्होमान्हु
त्वा आहवनीये दग्धात्मकं जुहुयात् सभ्यावसथ्ययोर्ग्निमतिर्मंथ्ययोनिपक्षे योनितः साधयतयोः सर्वान्होमान्जुहुयात् आहवनी
येन दग्धात्मकहोमः गार्हपत्याहवनीयोपगमे यदि न यत्तस्माद् दक्षिणाग्निमुद्धाप्य गार्हपत्यभस्मसमारोपणादि कृत्वा मथित्वा
गार्हपत्यायतने निधाय तस्मादग्निद्वयं प्रणीय पूर्ववत् प्रोक्तप्रायश्चित्तं कुर्यात् दक्षिणाग्नेर्भिन्नयोनिपक्षे नोद्धापनं गार्हपत्यद राम॰
क्षिणाग्न्योरनुगमने आहवनीयमुद्धाप्य गार्हपत्यभस्मसमारोपणादि कृत्वा मथित्वा गार्हपत्यायतने निधाय तस्मादग्निद्वयं प्रणी ६

यसर्वनाशोक्तप्रायश्चित्तं कुर्यात्‌ दक्षिणाग्न्याहवनीययोर्नाशे गार्हपत्याद्‌भयं विहृत्य दक्षिणाग्नौ चतुर्होतारं आहवनीये पंचहोतारं
हुत्वा तंत्रेण गार्हपत्ये दशात्मकं जुहुयात्‌ आहवनीये ज्योतिष्मतीष्टिः कर्तव्या इति प्रणयनपक्षे ग्निनाशप्रायश्चित्तं अजस्रपक्षे स
र्वाग्न्यनुगमने आयतनेभ्यो मंत्रेण भस्मनारणीक्रमेण संस्पर्श्य ततः प्रथममित्यादिना मथित्वा गार्हपत्यायतने निधाय तस्माद्दक्षिणा
ग्निमाहवनीयं च प्रणीय आज्यं संस्कृत्य सर्वनाशोक्तप्रायश्चित्तं कुर्यात्‌ आहवनीये स्थिते गार्हपत्येऽनुगते श्चेदाहवनीयं दक्षिणाग्निं
चोद्वाप्य गार्हपत्यभस्मसमारोपणं मंत्रेण कृत्वा मथित्वा गार्हपत्यायतने निधाय दक्षिणाग्निमाहवनीयं च प्रणीय सर्वनाशोक्त
प्रायश्चित्तं कुर्यात्‌ पक्षे आहवनीये स्थिते गार्हपत्येऽनुगते गार्हपत्यात्‌ भस्मापोह्य शकृत्पिण्डेन परिलिप्य आहवनीयाग्निं सह भस्मना नमादा
य दक्षिणेन विहारं आहृत्य गार्हपत्यायतने निधाय आहवनीयायतनं प्राकृतोपेन परिलिप्य गार्हपत्यात्‌ प्रणीय प्रज्वाल्य काचित्समिध
माधाय आज्यं संस्कृत्य षट्‌ स्रुवाहुतीर्जुहुयात्‌ उद्बुध्यस्वाग्ने त्वमग्ने सप्रथा असि मनोज्योतिस्तंतुं तन्वन्‌ उदुत्यं चित्रं देवानामिति ष
ड्भिः ततो गार्हपत्ये सर्वान्होतॄन्‌ जुहुयात्‌ षट्‌ स्रुवाहुतीरेव जुहुयादित्यन्ये गार्हपत्याहवनीययोः सहनाशे दक्षिणाग्निमुद्धृत्य तद्‌योर्भ
स्मसमारोपणं क्रमेण कृत्वा मंथनादि तां मथित्वा गार्हपत्यायतने निधाय तस्मादग्निद्वयं प्रणीय गार्हपत्ये सर्वान्होतॄन्हुत्वा दक्षिणे चतु
र्होतारं आहवनीये पंचहोतारं हुत्वा गार्हपत्ये दशात्मकं तंत्रेण जुहुयात्‌ गार्हपत्यदक्षिणाग्न्योरनुगमने आहवनीयमुद्वाप्य गार्ह

प्रा॰दी॰ पत्यदक्षिणाग्न्योर्भस्मसमारोपणं कृत्वा मथित्वा गार्हपत्यायतने निधाय तस्मादग्निद्वयं प्रणीय सर्वनाशोक्तप्रायश्चित्तं कुर्यात् दक्षि
१ णाग्न्याहवनीययोरनुगमने गार्हपत्यादुभयं प्रणीय दक्षिणे चतुर्होतारं आहवनीये पंचहोतारं हुत्वा गार्हपत्ये दध्यात्मकं तंत्रेण जुहु
7 यात् सर्वेष्वग्निष्वनुगतेषु असमारोपितेषु उदपात्रमयोपदिष्टां तत्राग्न्याधेयं प्रायश्चित्तं गार्हपत्याहवनीययोर्नाशे सति दक्षिणाग्नौ वि
द्यमाने उदपात्रमयोपदिष्टां न तत्राधानमिष्यते दक्षिणाग्नेर्ग्रामयोनिपक्षे पुनराधानं केचिदिच्छंति यद्यत्र समस्तनाशे सति तं तं पूर्व
वदुत्सादितेऽग्नौ अपादानम् ते च जुहूद्यास्त समस्ता आहुतीर्जुहुयात् अथवा नष्टोत्सादितेऽग्नौ अपादानम् ते जुहूमिंदाहुतीर्जुहुयात्
अथवा तत्तदग्निनाशे एकं द्वौ बहूनपि यथोक्तमुत्पाद्य जुहुयाच्चतुर्गृहीतमाज्यं मनस्वत्याहवनीये जुहुयात् नान्यत् नापादानं कापि विभागः
अन्याधिश्रपणार्थाग्नावनुगते योनितः साद्याहवनीये मनस्वतीं जुहुयात् पितृमेधार्थाग्नीनामनुगमने द्वयोरेकस्य वा सर्वेष्वेक
विनाशोक्तं होत्रादीनामन्यतमेन प्रायश्चित्तं कुर्यात् शारीरदाहादारभ्य संसृष्टानां नाशे भस्मसमारोपणाद्याहृता मथित्वा सर्वा
न्होतॄञ्जुहुयाद्याहृत्यादिभिर्वा दृष्टानुगतप्रायश्चित्तं अनुहूते पूर्वाग्नौ आदित्येऽस्तमिते दर्भेण हिरण्यं बध्वाग्रतो आदिष्टिलं वपित्वा
दक्षिणाग्निं प्रणीयाहवनीयार्थमग्निं प्रणयेत् एवादौ विभज्य पात्रासादनादि कृत्वा अग्निद्वयं मंत्रेण परिषिच्याहविः श्रपणादि दशहोत्रो एम॰
देस्यंतं कृत्वा दर्भेण हिरण्यं गृहीत्वा परिकर्म्य अग्नेर्योगच्छन्ति तमन्वक् बहुविद्वान् पणोवाचात्वे सं तं कृत्वा दर्भेग्निमादाय गच्छन्ति अन्व ७

गध्वर्युश्चाग्निहोत्रमादाय भूर्भुवः सुवरित्यादिनाहवनीयं गत्वान्यहस्तेग्निहोत्रं प्रदाय हिरण्यमाहवनीयायतने निधायानपनीय
मंत्रेणाग्निं निधाय समंत्रकं परिषिच्य मंत्रेणाग्निहोत्रहवणीं कूर्चे सादयित्वा मंत्रेण समिधमाहवनीये निधायातमितोः प्राणानाय
म्य पुनरुपमंत्र्य जुहुयात् अग्निर्ज्योतिरित्यादि सिद्धां तं कुर्यात् ते यद्यग्निषु वा पुनर्विहृस वा वाहणे विकुर्यात् इष्टायक्ष्य इति संकल्पः
वरुणायजुष्टं निर्वपामीति च हं निर्वपेत् इमं मे वरुणा तत्त्वा यामीति याज्यानुवाक्ये वरुणस्याहं प्रप्रजया चेति पूर्वाग्नावनुद्रुते आदि
त्योदयेस्ति दक्षिणाग्निं प्रणीयाहवनीयार्थमग्निं प्राग्वादौ विभज्याज्यं संस्कृत्य जुह्वां चतुर्गृहीत्वा पात्रासादनादि कृत्वाग्निरुपप
रिषिच्याहविरधिश्रयणादि दर्शहोत्रोदेस्यं तं हुत्वा चतुर्गृहीतमाज्यं पारिकर्म्यग्रतो न पतिः तमन्वक बहुविद्धा हला पोऽग्निमादाय
गच्छति तमन्वगध्वर्युरग्निहोत्रमादायाहवनीयं गत्वान्यस्मै प्रदाय चतुर्गृहीतमाज्यं स्रुवा सहाग्निस्थाने निधायानपनीय मंत्रेणाग्निं
निधाय पुरस्तात्प्रत्यङ्मुख उपविश्य चतुर्गृहीतमाज्यं आहवनीये जुहोति उषाः केतुना जुषतामिति मंत्रेण अग्निं परिषिच्याग्निहोत्र
कूर्चे सादयित्वा मंत्रेण समिधमाधायातमितोः प्राणानायम्य पुनः छंमंत्र्य जुहुयात् सूर्यो ज्योतिरित्यादि सिद्धं तां तान् ते यद्यग्निषु वा पुनर्वि
हृत्य वा मित्रदेवत्यामिष्टिं कुर्यात् इष्टा यक्ष्य इति संकल्पः मित्राय जुष्टं निर्वपामीति च हं निर्वपेत् अभी मंमहिना दिवं प्रस मित्र मर्तो
अस्तु इति याज्यानुवाक्ये मित्रस्याहं प्रप्रजया चेति अथ वा अनुद्रुते पूर्वाग्नौ रवावस्तमिते अभ्युदिते पूर्ववदग्निं प्रणीयाग्निहोत्रं जु

प्रा॰दी॰ त्वाजपं संस्कृत्य मनोज्योतिरित्यग्निं प्रादिति मंत्राभ्यां द्वे स्रुवाहुती हुत्वा भूर्भुवः स्वरित्याहवनीयमुपतिष्ठेत्। यद्यनुहृते पूर्वस्मिन्नेवावस्तमिते पूर्व
८ वदग्निं प्रणीयाग्निहोत्रं हुत्वा वरुणाय स्वाहेति स्रुवाहुतिं हुत्वाहुतिभिरुपतिष्ठेत्। अभ्युदिते च पूर्ववदग्निं प्रणीयाग्निहोत्रं हुत्वा मित्राय स्वाहे
४ ति स्रुवाहुतिं हुत्वाहुतिभिरुपतिष्ठेत्। दक्षिणाग्नावनुगते एवावस्तमिते अभ्युदिते च दक्षिणाग्निं प्रणीय पूर्वाहुतिभिरुपस्थानमेव नान्यत्
सर्वत्र प्रायश्चित्ते शीनां स्थाने पूर्णाहुतिः स्रुवाहुतिर्वा कार्या। इत्यनुद्धरणप्रायश्चित्तं। विहरणप्रभृति होमोपस्थानं पर्यंतं यजमानोऽत्र न वारि
भवेत्। यजमानः पत्नी वाग्निहोत्रागारे विहरणप्रभृति होमसमाप्तिपर्यंतं वसेत्। अग्निहोत्रपयोदोहनार्थं स्थापिता गौर्यदि निषीदेत्तामु
त्थापयेत् उदस्थाद्देव्यदितिमंत्रेणोत्थाप्य दुग्ध्वाग्निहोत्रं हुत्वा तत्र प्रायश्चित्तं मनस्वतीं जुहुयात्। वत्सोपसृष्टा यदि निषीदेत्तां मंत्रेणोत्था
प्य दुग्ध्वा पयसा ब्राह्मणाय दद्यात्। अत ऊर्ध्वं तस्यास्तेनाक्षात् अन्यां दुग्ध्वाग्निहोत्रं जुहुयात्। आ पुनर्होमकालाद्यजमानपत्न्योरुपवासो होमनन्त
री होमश्च। दुह्यमाने यदि स्कंदेत्स्कन्नमभिमंत्रयेत्। यदद्य दुग्धमिति स्कन्नस्योपरि जलं सिंचेत्। स्कन्नप्रोक्षेपाकथंचनाग्निहोत्रं हुत्वा तेष्वे
वाग्निषु अन्यां दुग्ध्वा पुनरग्निहोत्रं जुहुयात् मनस्वती होमः। अन्यकालादुपवासश्च एवं तत्स्कन्नप्रायश्चित्तं। दग्धहोत्री देस्यं तं यदा कदा वा स्कंद
ति तदा कुर्यात्। प्राङ्हरणीत्यादि वेद्यामासादनपर्यंतं यदि स्कंदति तत्र तत्राग्निहोत्रस्थालीं निधाय यदद्य दुग्धमिति स्कन्नमनुमंत्र्य स्थाला रम॰
मुपदोहं निनीय पुनरुन्नीयाग्निहोत्रं हुत्वा तेष्वेवाग्निषु अन्यां दुग्ध्वा पुनरग्निहोत्रं जुहुयात् मनस्वती उपवासश्च। वेद्यामासादनादि होम ८

पर्यंतंपदिस्कंदेतत्स्कंनमभिमंत्र्योपह्वेहंनिनीयोन्नीयाग्निहोत्रंहुत्वातेष्वेवाग्निषुअन्याऽग्ध्वापुनरग्निहोत्रहोमंकुर्यात्मनस्वतीहोमउ
पवासश्च·अग्निहोत्राहुतिरग्रेऽन्यत्रपदिक्षरेद्धुतस्सहविषोनाप्योवाक्षवेत्तदास्त्रुग्गतशेषेणपुनराहुतिंहुत्वात्वंनःसत्वंनइतिद्वेस्त्रुवाहु
तीहुत्वाभिदाहुतीहुत्वान्याऽध्वापुनराहुतिउपवासश्च·पूर्वाहुतौहुतायांयघुतराहुतिःस्कंदेत्पूर्वाहुत्याउपरियघुत्तराहुतिंजुहोतितदाप
त्रवेच्छवनस्पतइतिमंत्रेणाहवनीयेसमिधमाधायस्कन्नमभिमंत्र्यस्त्रुग्गतयोषेणोत्तराहुतिंहुत्वान्याऽग्ध्वापुनर्होमोमनस्वतीहो
मउपवासश्च·सर्वत्रोपवासआपस्तंबमतात्कृतः·पूर्वाहुतौहुतायामाहवनीयोनुगच्छेत्तदारौद्राएवाग्निरितिवदन्प्राकलेहिरण्यंनिधा
योत्तराहुतिंजुहुयात्·आहवनीयंप्रणीयाग्निनाप्राप्रायश्चित्तंकृत्वान्याऽध्वापुनर्जुहुयान्मनस्वतीच·अत्रपुनर्होममकेचित्रेच्छंतिस
र्वत्राहुतिमात्रस्कंदनेप्रायश्चित्तमिष्यते·आहुतिप्रमाणंचद्रवद्रव्याणांस्त्रुवबिलपूरणपर्यंतं·स्त्रुवबिलंचांगुष्ठपर्वप्रवेशनपर्याप्तं·
कठिनद्रव्याणांतुअंगुष्ठपर्वमात्रस्कंदनेप्रायश्चित्तंपदनाहुतिमात्रंतच्छिद्रप्रुडेव·भस्मसमग्रोहविर्धानेवैद्यास्तीर्येचबर्हिषिकूर्वेवि
प्रस्ययाणौचस्कंनदोषोनविद्यते·अग्निहोत्रेधिश्रितेश्वांतरागच्छेत्गार्हपत्याद्भस्मादायेदंविष्णुर्विचक्रमइतिमंत्रेणाहवनीयप
र्यंतंभस्मनांश्चुनःपदंप्रच्छाद्यमनस्वतीहुत्वाग्निहोत्रंजुहुयात्·मार्जारवराहमूषकादिभिरंतरागमनेप्याद्प्राग्गृहीतेनस्त्रुचंपरिषि
त्वाजातवेदसेसुनवामसोममनोज्योतिरितिद्वाभ्यांमहाव्याहृतिभिरितिपंचदुर्गादिगणांजुहुयान्मनस्वतींच·पुरुषादिभिरंतराग

प्रा॰ दी॰ मनेष्येत्तद्देवप्रायाश्चित्तं॰ अनो वारथ्यो वाऽग्नं तराग्नीगच्छेत्त॰ आहवनीयमुद्धाप्यगार्हपत्यादिध्ममादायपपदग्ने पूर्व्वमितिमंत्रेणाहव
६ नीयेनिधाय॰ त्वमग्ने सप्रथा असिजुष्टोहोतावरेण्यः त्वयायज्ञंवितन्वते॰ इत्युपस्थाय॰ मनस्वतीं हुत्वा पाथिकृतीष्टिं कुर्यात्॰
९ इष्टापव्यमितिसंकल्पः अन्वाधानादि अग्नयेपथिकृते ष्टाकपालं निर्वपेत्॰ अग्नेनपादेवानामितियाज्यानुवाक्ये॰ अग्नेः पथि
कृतोहमन्नादः क्रतुमध्ये अनोवारथ्योवांतराग्नीगच्छेत् क्रतुं समाप्य आहवनीयमुद्धाप्येसादिकृत्वा पाथिकृतीमिष्टिं कुर्यात् दक्षि
णापा आम्नानात् उक्तंच॰ यानि हवींषि कामेन वा दक्षिणया वाप्यपेतानि स्युर्नाहं वीष्येवतानिजानीयादिति॰ वाजपेये रथांतराग
मनेनदोषः तंत्रमध्ये पतितानामिष्टीनांकपालनाशेष्टिवत्प्रयोगः अधिश्रितमग्निहोत्रेपयस्तापाड्ढत्तं विष्यंदेत्तत्सपआदापउदङ्ः
स्यवल्मीकवपायांप्रजापतेनत्वदितिहुत्वा भूरित्युपस्थायान्यांदुग्ध्वापुनर्जुहुयान्मनस्वतीं च॰ अग्निहोत्रार्थे पयो पदि कीटायतनं स्या
त्तत्पयोमध्यमेनांत्पर्णेन वा पलाशपर्णेन महीद्यौः पृथिवी इत्युत्सवांतः॰ परिधिदेशे निनीयान्यांदुग्ध्वापुनर्जुहुयात्तन्मनस्वतीं च॰ अग्निहो
त्रार्थे पयो पद्यवत्तष्टं स्यात्तत्पयो मित्रोजनानितिमंत्रेणाहवनीये हुत्वान्यां दुग्ध्वा पुनर्जुहुयान्मनस्वतीं च॰ अग्निहोत्रस्थालीस्रवंती
मभिमंत्रयते॰ गर्भंस्रवंतमगदमकरितिः मृदादिनासंदध्यात् विधुं दद्राणमितिमनस्वतीं जुहुयात्॰ अग्निहोत्रस्थालीभिन्नावेत्तस्याः स्था एम॰
नेऽन्यांस्थालीं निधायाभिमंत्रयते भूएपुर्मे धारयत प्राणं मे धारयतेति॰ द्वादशप्रागगृहीतेन स्रुचं पूरयित्वा दुर्गादिगणेनजुहुयात्॰ मिंदा ६

दिग्गणो वा प्रायश्चित्तं कृत्वा भग्नमप्सु प्रक्षिपेत् भूमिर्भूमिमगादिति सर्वत्र मृन्मयानां पात्राणां भेदने एकमेव प्रायश्चित्तं दारुमयानां पात्राणां
भेदनादौ तत्स्थाने मंत्रं निधाय भूरपुर्भद्रं रूपमिमं मदुर्गां दिग्गणां कृत्वा भिन्नं दारुमयं पात्रं भूमिर्भूमिमगादित्याहवनीये प्रहरेत् केचिद्द्रौ द्रुंग
गवी साध्वयस्थाने हविषः स्कंदनादिदोषसंभवे तत्तद्दारस्क्षोक्तदेवतायै कृत्वा मांडग्ध्वा पुनरग्निहोत्रं जुहुयात् मनस्वती च अधिश्रित
ममेध्येन दुष्येच्चेद्दधिश्रयणांगारेषु तत्स्थाने निधाय तत्सां दग्ध्वा पुनर्जुहुयात् मनस्वतीं च प्राङ्क्षरतं हविरमेध्येन पघाप घेत पूर्वाग्नौ स
मिधं क्षिप्त्वा तस्मादुद्गुधं भस्मनि रूह तस्मिं स्कंदीनि नीयासां दग्ध्वा पुनर्जुहुयात् मनस्वतीं च अनंतरं पूर्वोक्तेषु त्रिषु अग्न्याभावे उप
दोहे नाग्निहोत्रं जुहुयात् दग्ध्वा पुनर्जुहुयात् मनस्वतीं च सर्वेषु अग्निषु प्रयत्नं विना प्रज्वलितेषु उद्धिष्यस्य जातवेदसा नो हिंसीर्जात
वेद इत्यारण्यकमंत्राभ्यां स्वयं प्रज्वलिते गौ हौ समिधौ क्षिप्त्वा सर्वं प्रायश्चित्तं जुहुयात् आहुतीनां सर्वप्रायश्चित्तसंज्ञा अनाय दिलौकि
केष्वग्निष्वग्निहोत्रहोमे कृते अत्यल्प विघ्ने रविघ्नैः कन्यापाप्त्यावि हुते पितान श्रीन्याहृतिभिर्विहृस्य मनस्वत्या पूर्णाहुतिं कृत्वा तंतुमती विकु
र्यात् पपःपाकार्थावग्नावनुगते पोनिततुसाध्यहोत्रादीनां मन्यतमेन प्रायश्चित्तं कुर्यात् कूर्चपरिस्तरणादीनां दाहादौ एकदेशस्य दाहे
त्तत्स्थाने नापो पूर्ववदन्यं कृत्वा स्थाने निधाय त्वमग्ने अयासि प्रजापत इत्येताभ्यां द्वे स्रुवाहुती जुहुयात् अग्निहोत्रविषये सर्वत्राना
दिष्टप्रायश्चित्त स्थाने मनस्वतीं जुहुयात् कर्मकाले कालांतरे वा गार्हपत्याग्निः शम्याप्रासादर्वाग्यदि निर्गच्छेत् तदा इदं त एकमिति मंत्रे

प्रा॰ दी॰ णांगारं स्वस्थाने विप्रक्षिप्य मनस्वतीं जुहुयात्॥ ग्रामप्रासादूर्ध्वं यदि निर्गच्छेत् यस्याग्नेरंगारः पत्र निर्गतः स्यात्तत्र तस्याग्नेरायतनं कृ॥
१० त्वा तदनुगुणं विहारं कल्पयित्वाग्नीस्तत्र निधाय मनस्वतीं हुत्वा प्रायश्चित्तीमिष्टिं कुर्यात्॥ सा पूर्वमेवोक्ता॥ एवमिष्टिं कृत्वैकामहर्वसे
10 त्॥ श्वोभूते गृहं प्रविशेत्॥ यजमानः पत्नी चोभावुदवासमपश्चेत्त्वा यदि अग्निरेकाग्रे वसतः यजमानस्यान्यपरत्वे पत्न्यैव वप्स्यं वसेत्॥ पत्न्याः
कार्यान्तरपरत्वे यजमानो वप्स्यं वसेत्॥ यदि पत्नी यजमानश्च सहोदवासमयवेलायां वास्तुसीमां ग्रामसीमां वा निष्क्रम्य वसेतां तदाग्न
यो लौकिका भवन्ति॥ अविच्छिन्नमग्न्याधेयं भवति॥ तथा च कात्यायनः विहायाग्नीन्स भार्यश्चेत्सीमामुल्लंघ्य गच्छति॥ होमकालात्ययेतस्य
पुनराधानमिष्यते॥ उदवासमयव्यतिरिक्तकालेपि तयोर्महासीमातिक्रमणं केचिन्नेच्छंति॥ एष्टव्यविश्रमादौ पक्षहोमं कृत्वा त्रिषट्द
शादिनानि एकत्रोषित्वा मयासन्वा स्तोष्यतीयं हुत्वा जलैः समारोप्य वा प्रयायात्॥ उद्धरणपक्षे गार्हपत्यस्यैव समारोपणं॥ अजस्रप
क्षेत्रयाणां समारोपणं॥ दक्षिणाग्नेर्भिन्नयोनित्वे दृष्यगरणीभ्यां समारोपणं॥ सभ्यावसथ्ययोस्तथैव॥ अजस्राननीन्हरेत्॥ ग्रामप्रासा
दूर्ध्वाङ्गनोद्धृत्य पुरुषेषु धृत्वा पुरुषेषु यो लौकिका भवन्ति॥ तदाग्न्याधानं प्रायश्चित्तं॥ अत्र ग्रामप्रासादूर्ध्वहरणे उद्धासेन दोषः॥ अजस्रहरणे
समारोप्य हरणे च यजमानः पत्नी चान्वारभेयातां॥ तदभावे अग्नयो लौकिका भवन्ति॥ तदाग्न्याधानं प्रायश्चित्तं॥ अशक्यविषये वपनमस् राम॰
तरण्यां संकार्यः॥ समारोप्य हरणे यं तेयो निर्कृत्वि यदूत्सरण्योः समारोपणं॥ आत्मसमारोपणं॥ उद्धरणपक्षे गार्हपत्यस्यैव त्रिजिघ्रणमा १०

त्मनि समारूढेषु अग्निषु नाप्सु निमज्जेत् न मैथुनं व्रजेत् अमेध्यभूम्यादिस्पर्शे जलस्य च रणौ वाग्नयो न भ्रंशंति अग्निषु दीप्यमानेषु
समारूढेषु चारण्योः अभूद्वा पमपतितत्यासभरजस्वलासूतिकाचंडालक्षपणमेध्यादिभिः स्पर्शने अग्नयो न भ्रंशंति वसाशुक्रामए
क्मज्जामूत्रविट्कर्णविट्नखांश्लेष्माश्रुपूतिकास्वेदो द्वादशैते नृणां मलाः एतैश्च स्पर्शने गीतानां नाशः तत्राधानं प्रायश्चित्तं अग्निषु
नष्टेषु अरण्योर्नाशे पुनराधानमेव प्रायश्चित्तं अग्निं रजस्वला चेत् स्त्री संस्पृशेत् अग्निहोत्रकं दृष्टिः अष्टाकपालेन कार्या तु शुचये अग्नये इ
ति मतांवरवचनात् रजस्वलापाग्निसंस्पर्शे दृष्टिरेव नाधानमिति केचित् विच्छिन्नाग्नेरपहताग्नेः समारूढेषु नष्टारणीकस्य च कालोनवे
क्षपः निमित्तानंतरमेव तत्कार्यं गोपित्रपेक्षा वर्ज्यं संकलोऽकाल्विग्वरणाद्यविकृतमग्न्याधेयं भवति सर्वत्र प्रायश्चित्ताधानानंतरं अतिपन्ना
न्सायमग्निहोत्रहोमान्सर्वान्सलक्ष होमविधानेन समस्य हुत्वा तदानीमेव संवेशनादि नाग्न्यवधानं कृत्वा पुनर्विहृत्य सर्वान्प्रातर्होमान्स
मस्य जुहुयात् अतिपन्नहोमात्पूर्वं मनस्वतीं तंतुमतीष्टिं च कृत्वा अतिपन्नाग्निहोत्रहोमान्हुत्वा काले अग्निहोत्रं जुहुयात् बहूपवीतिक्राम
प्रायश्चित्तार्थं अन्वारंभणीयां कृत्वातिपन्नपाकार्थं पपिष्टहैश्चानपौ समानतंत्रे प्रतीष्टिर्वा सर्वार्थं सकृद्धा कृत्वानंतरं अतिपन्नं द
र्शं वा पौर्णमासं वा कुर्यात् केवलारणीनाशे भवतनः समनसाविति द्वे उपहतां अरणीं अप्सु प्रक्षिपेत् समारूढेष्वरण्योरमेध्यादिभि
रत्योपहतौ मथित्वाग्नीन्विहृत्य सात्रिहविः पच्यमाने अपि कर्तव्या दृष्टा पक्ष्य इति संकल्पः अग्नये पवमानाय अग्नये पावकाय अग्नये शुचये

प्रा॰दी॰ ष्टाकपालपुरोडाशमग्निर्वपेत्॰ अग्नयआयूंषिपवसेग्नेपवस्व॰ अग्नेपावकस्तनः पावक अग्निः शुचिव्रततमउदग्नेशुचयस्तवेति याज्या
११ नुवाक्याः त्रयाणामप्यन्वादः अग्नीनां विच्छादेभिरन्योपहतौ येनकेनापिकारणेनाग्नीनां दौर्बल्येसमारोप्यमथित्वात्रिहविः पूर्वोक्ताक
र्तव्याः सर्वत्राग्नीनामन्योपहतौ पुनस्त्वेतिसमिदाधानं स्रुवाहुतिश्च समानदेशरण्योरन्योपहते रमथित्वाग्नीन्विहृत्य मनस्वतीं जुहुयात् आ
त्मनिसमारूढेष्वग्निषु अपाननादौहुते अरण्योरुपावरोहसमंथेत् अथवालौकिकाग्नौवाउपावरोह्यविहृत्यमनस्वतीं जुहुयात् य
जमानः पत्नीवाग्नीन्विहायसंवत्सरमतिकवत्प्रवसेत् यदि तदातयोः पवित्रौषधिः प्रायश्चित्तं अग्निहोत्रहोमेययप्राप्तानिसहोमः पयसो
भावेव्रीहिभिर्यवैर्वाहोमः तयोरभावेश्यामाकादिभिरारण्यैः तेषामभावे तैलंदधिपयः होमोयवागूरोदनंघृतं तंडुलोमांसमाषश्च
द्रव्याद्व्याप्यनुक्रमात् द्रव्येतेषामन्यतमेनजुहुयात् दध्नोधिश्रयणंनास्ति आज्यतैलयोः परिषेचनस्थानेदर्भाग्रदंप्रक्षिपेत् ओदन
पक्षोसिद्धमोदनमानीयजुहुयात् यवागूमन्त्रैवश्रपयेत् तंडुलानांचमांसहोमयोरधिश्रयणहेचनैः श्रीमादीनांचद्रव्याणांअभावेमं
त्रजपः यजमानपत्न्योरसमक्षंपुत्रादिनाग्निहोत्रंनहोतव्यं द्वयोरप्यसमक्षंतुहुतंगदहुतंभवेदितिकात्यायनवचनात् आतीनांहरण
स्यकालः पुरादित्यस्यास्तमयात्पुरादित्यस्योदयादित्याचार्येणोक्तत्वात्कहिहरणानंतरं अस्तमयोदयौयथाभवतस्तथाविहरेत् अधिहृ राम॰
क्षास्तूर्पिः आविः सूर्योवेति आपस्तंबेनोक्तं उपोदयास्तमयोत्तूर्ध्वंघटिकाद्वयंविहरणस्यकालः अग्निहोत्रहोमस्यउदयानंतरंअस्तमया ११

नंतरं च मुख्यः कालः सायं प्रदोषांतः प्रातः संगवांतो वा मुख्यः कालः सायंहोमस्य निशा सर्वा गौणः कालः प्रातर्होमस्य सर्वमहः गौणः कालः आप
त्सु गौणकालेपि कुर्वन्नप्रायश्चित्तं नाचरेत् अनापदि गौणकालेपि न कुर्यात् कुर्याच्चेद्यथोक्तं प्रायश्चित्तं कुर्यात् रजन्याः सायं चतुर्थो भागः प्र
दोषः दिवसस्याद्यचतुर्थो भागः संगवः सायंहोमस्य गौणकालातिक्रमे सायंदोषावस्तर्नमः स्वाहेति स्रुवाहुतिं हुत्वा अतिक्रांतम
ग्निहोत्रं हुत्वा नंतरकालेग्निहोत्रं जुहुयात् प्रातर्होमगौणकालात्यये प्रातर्दोषावस्तर्नमः स्वाहेति स्रुवाहुतिं हुत्वा अतिक्रांतमग्निहोत्रं हुत्वा
कालेग्निहोत्रं जुहुयात् उभयत्र मनस्वतीं वा हुत्वाग्निहोत्रं जुहुयात् द्वित्रिहोमाद्यतिपत्तौ मनस्वतीं तंतुमतीष्टिं प्रतिहोमं प्रायश्चित्तं एका
हाद्यग्निहोत्रातिपातने तंतुमतीष्टिं कृत्वा अतीतहोमान्परिसंख्याय पक्षहोमविधानेन कुर्यादित्यपरः दीसाग्नेः षण्मासादिर्दं प्रायश्चित्तं
दीसाग्नेः षण्मासपर्यंतं अहुतेग्निहोत्रे चतुर्हविरिष्टिः कार्या इष्ट्या पक्ष्ये इति संकल्प्य अग्न्यन्वाधानादि अग्नये पथिकृते अग्नये व्रतपतये अग्न
ये वैश्वानराय अग्नये व्रतपतये पुरोडाशान्निर्वपेत् तत्र वैश्वानरः पुरोडाशो द्वादशकपालः इतरे ष्टाकपालाः वैश्वानरो न ऊत्या पृष्टो दिवीति
वैश्वानरस्य त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीति त्रितयं तेषु सर्वेषामनाद्यं वैश्वानरस्य सुचिरस्तो मे ध्य इति वा एवमिष्टिं कृ
त्वा अतीतहोमान्परिसंख्याय पक्षहोमविधानेन हुत्वा मासमग्निहोत्रं जुहुयात् दीसाग्नेः संवत्सरपर्यंतमग्निहोत्राहोमे एतामिष्टिं कुर्यात्
इष्ट्या पक्ष्ये इति संकल्प्य अग्नये पवमानाय अग्नये पावकाय अग्नये शुचये अग्नये पथिकृते अग्नये व्रतपतये वैश्वानराय अग्नये व्रतपतये इति स

प्रा॰दी॰ सपुरोडाशान्निर्वपेत्॰ अत्रापि वैश्वानरो द्वादशकपालः इतरेष्टाकपालाः याज्यानुवाक्याः पूर्वमेवोक्ताः कृतानुमंत्रणं चोक्तं॰ एवमिष्टिं समा
१२ प्यातीतहोमान्परिसंख्याय पक्षहोमविधानेन हुत्वा प्रासमग्निहोत्रं जुहुयात्॰ समानस्थाग्नेरप्येकाहाद्यग्निहोत्राहोमे तंतुमतीष्टिं कृत्वा प्रतिहो
12 मं मनस्वती च प्रायश्चित्तं॰ षण्मासाद्यग्निहोत्राकरणे चतस्र इष्टीः कुर्यात्॰ प्रथमायानानयेष्टाकपालं पुरोडाशं निर्वपेत्॰ द्वितीयायामानये पव
मानायाष्टाकपालं निर्वपेत्॰ तृतीयायामानये तंतुमतेष्टाकपालं निर्वपेत्॰ चतुर्थ्यामग्नये पथिकृतेष्टाकपालं निर्वपेत्॰ चतसृणां याज्या
नुवाक्याः पूर्वमेवोक्ताः॰ हुतानुमंत्रणं च॰ एवं चतस्र इष्टीः कृत्वातीतहोमान्परिसंख्याय पक्षहोमविधानेन हुत्वा प्रासं जुहुयात्॰ प्रोषिते य
जमाने एकाहाद्यग्निहोत्राहोमे मनस्वतीं तंतुमतीष्टिं चुर्पा प्रायश्चित्तं कुर्यात्॰ यजमानः प्रवसन्प्रवासोपस्थानमकृत्वा यदि प्रवसेत्तदा साय
मग्निहोत्रोपस्थानकाले उदङ्मुखो विहाराभिमुखो वा इहैव संतं तत्र सतो वो अस्मय इति अनेनोपस्थाय निशेनोपप्रयंतो अध्वरमित्यने
नोपतिष्ठेत्॰ एवं प्रसहं उपस्थाय पुनरागत्य ममनामतवेत्युपस्थानं कुर्यात्॰ अथाग्निहोत्राणां समासः॰ एष्टु विभ्रमे व्याधिपीडायां अध्वग
मनप्रसंगे गुरुकुलवात्मापेक्षायां पितृमातृकलत्रपुत्राद्यसपेबलवत्ताविरोधादौ देशकालद्रव्यानुपपत्तौ वा असंतापस्तुवा अग्नि
होत्राणां समासः॰ अतिपातनिमित्तेषु यदा कदाचात्मायमग्निहोत्रहोमान्समस्य हुत्वा तदानीमेव संवेशनेन वा निमीलनेन वा उपसमाधा एम॰
नेनाग्ववधानं कृत्वा पुनर्विहृत्य समानतरग्निहोत्रहोमान्समस्य जुहुयात्॰ अनतिपातेषु निमित्तेषु आमावास्येनेष्ट्वा प्रतिपदि सायं पंच १२

दृष्टचतुर्गृहीतान्युपरि उपरि गृह्णातीति तिथिवृद्धिवशात् तत्र प्रयोगः अग्निहोत्रहोमान्समस्य होष्यामीति संकल्पः विहरणादिकृ
त्वा पक्षातिपि संख्यापाव पिष्टतिथिसंख्यापावा चतुर्गृहीतान्युपरि वा चतुर्गृहीतानि गृह्णाति स्रुचि परिणाममनु स्रुग्मात्रे गृह्णीयात् एका
समितं मध्यमाः कृतिरेकाहितीयाकृतिरेवस्तहहतः पक्षानंसकृत् स्रुच्यापि निमार्जनं च एवमेकैका पक्षावधि समासः पक्षान्तरेणं संक्रमयेत् अ
मावास्यातिथेरर्वाक् कृष्णपक्षे समासः प्रतिपत्प्रातः पर्यन्तं शुक्लपक्षे समासः निमित्तसंपातात् समासेक्रियमाणे पि निमित्ताभावे समासस्याहानस
मत्वे नापि काले काले होमः आपत्स्वपि पूर्वपौर्वपो स्यान्न मतिकर्षः पक्षमध्ये पि निमित्तसंभवे शेषे होमान्समस्येत् आलस्येन लोभेन वा
श्रद्धया वा पक्षहोमान्न समस्येत् अनापदि पक्षहोमकरणे तु मतीष्टिः प्रायश्चित्तं पक्षादौ पक्षमध्ये वा एकत्रैमध्यन्दिने पि वा निमित्त
संभवे होमान् समस्येत् स हरैव तु अनापद्यग्नीन्सर्वथा नोत्सृजेत् आपत्स्वग्नीनुत्सृजन्नुत्सर्गेष्टिं कृत्वोत्सृजेत् आपदि निवृत्तायां पुनरा
धानं कृत्वा तं तु मसापजेत् अग्नीनां लौकिकाग्निसंसर्गे अन्याग्निसंसर्गे परस्परसंसर्गे वितानरण्योरग्नीन्समारोप्योद्वसायमथितावग्नीवि
हृत्य मनस्वतीं जुत्वाद्धि हविष्मिष्टिं कुर्यात् इष्ट्या पक्षप्रवृत्तिसंकल्पः अग्नये विविचये अग्नये व्रतपतये वाष्टाकपालौ पुरोडाशौ निर्वपेत् वि
तेविषक्ताम गन्येमानुषीरीडते इति विविचये याज्यानुवाक्ये त्वमग्ने व्रतपा असि पत्नीदेवपे प्रमिनाम व्रतानीति व्रतपते त्वपोरण्यन्नादन्य
ग्राअग्निसंसर्गे अग्नये पथिकृते अष्टाकपालं पुरोडाशं निर्वपेत् इत्येके इदं प्रायश्चित्तं व्यान्निसंसर्गे अन्याग्निसंसर्गे च परस्परसंस

प्रा॰दी॰ गेंच॰ तत्र तत्र मनस्वत्येव प्रायश्चित्तं॰ यस्याग्निषु अन्यः स्वाग्निबुद्ध्या यजेत सोऽरण्योराग्नीन्समारोप्योद्वसाय मथित्वाग्नीन्विहृत्य षड्द्वादशकपालौ
१३ पुरोडाशौ वैश्वानरेष्टिं कुर्यात् याज्यानुवाक्ये ऽकृते कृतानुमंत्रणं च॰ अत्यार्थं मुहूर्तं पनेरुपरि पुनरन्वार्थमुहूर्तेणेहृते तत्र प्रायश्चित्तं दूरस्था
13 यस्यदूति संकल्प्यः अग्नये ऽग्निवते ष्टाकपालं पुरोडाशं निर्वपेत् अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निनेति याज्यानुवाक्ये॰ अग्नेरग्निवतो होम
न्नादः यदर्थं मुहूर्ते ग्नौ दत्ते यां कपातदर्थमेव पुनरुद्धृते तत्र प्रायश्चित्तं न विद्यते॰ अग्निहोत्रस्य पावकजीवं विधानात्॰ जरयाव्याधिनाद
रिद्रत्वेन वा अग्निहोत्रं कर्तुमशक्नुवन्यजमानो यातेऽग्नेयत्रियातनरित्यात्मन्समारोपणं कुर्यात्॰ प्रणयनपक्षे गार्हपत्यमेव त्रिरवा॥
जिघ्रेत्॰ अजस्रपक्षे ग्नित्रयमपि त्रिस्त्रिरेकैकं समाजिघ्रेत्॰ एवमात्मनि समानः ठेषुनत्वोदेन्तपि देन्तोपरिशय्यायां शयीत नाप्सु निमज्जेत न
मैथुनं न्नेजेदित्ये तदनापद्विषयं॰ आपदि मज्जने मैथुने निषिद्धनिपपातिक्रमे मनस्वती मंत्रजपः प्रायश्चित्तं॰ अग्निहोत्रहोमकाल
दूपे प्रक्षालितपाणिपादो यजमानः अपआचम्य प्राङ्मुखउपविश्य अग्निहोत्रद्रव्यं होममंत्रेणाप्रथममल्पं भक्षयित्वा प्रजापतिम
नसाध्यायन्तूष्णीं भूयो भक्षं भक्षयेत्॰ अग्निहोत्रविषये त्रिजीर्णाआपाहिरपातादेवं कुर्यात्॰ व्याधिपीडितो दारिद्र्यव्याधिदारिद्र्याग
मे अग्नीनुपावरोहजातवेद इत्युपावरोह्य पुनः काले काले ग्निहोत्रं जुहुयात्॰ प्रवसन्यजमाने ऽपक्षय प्रवसेत् यजमाने ग्निसमी एम॰
पस्थे सति यद्यपि प्रवसेत्॰ यजमानः पत्न्या सह न प्रवसेत्॰ बहुपत्नीकोऽप्येकया सह न प्रवसेत्॰ अस्तु पायोप्रवसतीतियोयंप्रोषि १३

तत्स्त्री निषेधः । सङ्क्रमोऽथ भर्तृद्वारा स्त्रीविषयः । यदि पत्नी सीमान्ते पुनराधानमिति भरद्वाजवचनं च प्रोषितभर्तृकाविषयं । यजमानः पत्नी चोभ
ये ग्रामान्तः सीमां बहिः सीमां चातिक्रम्य प्रवसतः तदाग्नयो लौकिका भवंति तदा पुनराधानं प्रायश्चित्तं यजमानस्य पत्न्या वा संवत्सरमतिक्राम्य
प्रवासे यविष्ठेष्टिः प्रायश्चित्तं । प्रोषिते यजमाने राष्ट्रविभ्रमादि प्रवासनिमित्तोत्पत्तौ पत्नी अग्निभिः सह प्रवसेत् । तत्र क्रमः । अध्वर्युः पक्षहो
मविधानेनाग्निहोमान्तं समस्य कृत्वा अग्निष्ठे नस्याग्निहोत्रोपकरणपात्रादिकं सर्वमारोप्य दक्षिणमनड्वाहं युक्त्वाज्यं संस्कृत्य तावन्मा
त्रोपयोगिमापर्वमप्यास्रुचा चतुर्गृहीतमाज्यमाहवनीये जुहोति । वास्तोष्पते प्रतिजानीह्यस्मान् । शं न एधि द्विपदे शं चतुष्पदे । वास्तो
ष्पते शग्मया संसदा ते॰ स्वस्तिभिः सदा नः स्वाहेति जुहुयात् । ऋचा न प्रणवं संधानं । स्रुचमाहवनीये प्रक्षिप्य सर्वं युक्त्वा अयं तद्रूस
वारण्योरग्नीन्समारोपयेत् । अजस्रपक्षे त्रयाणां समारोपयत्त यथा । अयं यानपक्षे गार्हपत्यस्यैव समारोपणं । एवं समारोप्यारणी शकटे
निधाय पत्न्यपि शकटमारोह्य अग्निभिः सहाभिलषितं देशं गत्वा तत्राग्निविहारं कल्पयित्वा मथित्वाग्नीन्विहृत्याज्यं संस्कृत्य मनस्वन्तौ चतु
र्गृहीतमाज्यं कृत्वा तन्तुमतीं विंकुर्यात् । सा पूर्वमेवोक्ता । शाखाएवं दक्षिणां दद्यात् । एकभोजनपर्याप्तमन्नं भा एवं । अथ यद्यग्न्यरणी जीर्णे स्या
तां जन्तुभिर्मथनेन वा कार्याक्षमे स्यातां तदा येन्नष्टे यहृते वा भवतस्तदोत्सेधायामविस्तारजातीयैः पूर्वारण्योः समे अन्ये रनुपयु
क्तेऽकृतलक्षणलाक्षिते कार्यक्षमे नवे अन्ये अरणी संपाद्यामावास्यायां प्रातरग्निहोत्रं हुत्वा । अश्वत्थाद्धव्यवाहादिति मन्त्राभ्या

प्रा॰दी॰ मरणीआहृत्य अग्न्यन्वाधानादिहृत्वोपोष्य श्वोभूते दग्धे नष्टे जीर्णे अरणी प्राकलीकृत्य गार्हपत्ये प्रक्षिप्य प्रज्वाल्य नवे अरणी परि
२४ दक्षिणेनोत्तरारणिं सव्येनाधरारणिमादाय गार्हपत्याग्नेरुपरि धारयन् जपति "उद्बुध्यस्वाग्ने प्रविशास्व योनिमि"ति सौत्रमंत्रमुक्त्वा अ
१५ यं ते योनिरि"ति मंत्रेण नवारण्योः समारोपः कृतः प्रथममित्यादिना मंथनादि कृत्वा गार्हपत्यायतने प्राक्तनोत्पन्नं परिलिख्यायतने
निधायाग्निरूपं प्रणीयमनस्वतीं हुत्वा तंतुमतीष्टिं कुर्यात् सा पूर्वमेवोक्ता एवमेव पदाय पदा अरणी जीर्णेष्यातां तदा तदा कुर्यात्
सर्वत्रान्वाहार्यपादक्षिणापाः समुच्चयः अनुक्तदाक्षिणानां प्रायश्चित्तेष्टीनां हिरण्यं दक्षिणां दद्यात् अन्वाहार्येण समुच्चयः क्रतुम
ध्येपघरणी जीर्णे स्यातां उपहते वा तदानीमेव नवे अरणी आहृत्य उपहतारणीमप्सु क्षिपति भवतं नः समनसावितिजीर्णे शकली
कृत्य गार्हपत्ये प्रक्षिप्येत्यादि तंतुमतीष्टिं तं कुर्यात् अग्निषु समारूढेषु अधरारणी कार्याक्षमा चेत् उत्तरारण्यपर्धमधरारणिं कृत्वा
मंथनं कुर्यात् उत्तरारणी कार्याक्षमा चेद्धरारण्यपर्धमुत्तरारणिं कृत्वा मंथनं कुर्यात् सयनं तत्काल एव नवे अरणी आहरेत् अग्निपु
समारूढेषु उभयोः कार्याक्षमत्वे पुनराधानं न कुर्यात् सर्वत्र विहितं होमं कपालस्यादिना न कुर्यात् सर्पोदपा सर्वेयानि विहितानि
कर्माणि तेषामकारणे दिवा समापनीयानां कर्मणां चासमापने एतेषु मनस्वत्याचतुर्गृहीतहोमः प्रायश्चित्तं सोदरे ज्येष्ठे विवाहार्हे वि एम॰
घमाने परित्रियमुद्वहेत् स परिवित्तिः तस्य ज्येष्ठः परिवित्तः तस्मै यः कन्यां प्रयच्छति स परिविदानः ज्येष्ठेच्छिन्नं विवाहार्थं यः कन्यां निश्चि १५

नोतिसप्रागुद्वाहकर्मणःपरिविविदानउच्यते॰योज्येष्ठेस्थितेअग्न्याधानंकरोतिसपर्पर्याधानःज्येष्ठस्तुपर्याहितःज्येष्ठेस्थितेयःसोमेनय
जतेसपर्येष्टाज्येष्ठस्तुपरीष्टः॰एतेषांसमस्तमुक्तंप्रायश्चित्तानंतरंमनस्वतीहोमश्चप्रायश्चित्तं॰यःसोमंवपतिससोमवामी॰यश्चसोमंविरेच
पतिससोमातिपवितः॰भक्षणात्रमेणयःसोमंनभक्षयतिसभक्षांतरितः॰योदितंभक्षंयोनभक्षयतिसभक्षरहितः॰तेसर्वेस्याग्नौमनस्व
तीजुहुयुः॰अग्निष्टुतैष्टुअविधाननौत्सादनेविधानेनोत्सादनेपिउक्तप्रायश्चित्ताकरणेसतिहूयमानेष्वग्निहोत्रेअष्टमाग्निहोत्रका
लादूर्ध्वमकृतसमत्वादाधानंकर्तव्यं॰यतःएत्रमहूयमानोग्निलौकिकःसंपद्यतइतिवचनात्॰अष्टमाग्निहोत्रकालात्पूर्वमेवान्यथा
कृतमितिज्ञातंचेद्विधानेनाग्निमुत्पाद्ययथोक्तंप्रायश्चित्तंकृत्वाकृतानामग्निहोत्रहोमानामकृतप्राग्योमविच्छेदप्रायश्चित्तंमनस्व
तीकृत्वाप्रतिहोमंकुर्यात्॰गार्हपत्यस्यान्यथोत्सादनेएकःकालिन्होमकालेअतीतेआधानंकर्तव्यंउद्वास्तमपासर्वेअन्यथाकृतमिति
ज्ञातंचेद्विधोनेनाग्निंपुनरुत्साद्योक्तप्रायश्चित्तंकुर्यात्॰अरण्योरमेध्यादिनोपघातेसतिअग्नीनस्मसमारोहितःपालयेत्॰अअरणिस्वीका
रात्॰अरणिस्वीकारात्पूर्वंपद्यग्रयोनुगच्छेयुःनदाग्न्याधानमेवप्रायश्चित्तं॰तथाचकात्यायनः॰अरण्योःक्षयनाशदाहेष्वग्नीन्समाहितःपालये
दुपशांतेष्वाधानमिति॰यद्यग्निहोत्रीलोहितंकुत्स्यात्तदायजमानादीननिष्क्रापयेतितसंप्रेष्यतिविहारादहिर्गच्छतेत्यर्थः॰तदादक्षिणा
ग्निंकटादिभिःपरिश्रित्यदक्षिणाग्नौश्रपयित्वातस्मिन्नाहुतिभिःतत्क्षीवासर्वेजुहुयात्॰ततोग्निहोत्रीगांतस्मैब्राह्मणायदद्यात्यज

प्रा॰दी॰ मानोपस्पस्समीपं न गच्छेत्। ततोन्यां दुग्ध्वाग्निहोत्रं जुहुयात्। अग्निहोत्री वत्सोपसृष्टा यदि प्राबद्धं करोति तदा लौकिकेनाज्येनाहवनीये जुहो
१५ ति। यस्मादग्नी वा वायुर्विष्ठा इति। अपरं यस्य यत्र इति। अथवा न पर्वाद्ये नु मभिमंत्र्ये येन्न होमः। उन्नयनकाले च तुर्यमुन्नीयमानं यदि स्कंदेत्तच्छाला
15 मुपदोह्य प्रोषमानीयस्कत्र मभिमंत्र्य पुनश्च तुर्यमभ्युन्नीयाग्निहोत्रं जुहुयात्। यघनस्तमिते अस्तमित प्रयांत्वाग्निहोत्रं जुहोति अका
लेहुतस्याहुतसमत्वात् तस्मिन्नेवाहवनीये पुनः परिषेकादिसांगो होमः कर्तव्यः। प्रणयनस्य कालेहुतत्वान्न पुनः प्रणयनं। होमानंतरं भव
तं नः समनसाविति आहवनीयगार्हपत्यावुपतिष्ठते। यदि प्रातरुदयात्पूर्वं उदितमांत्वाग्निहोत्रं जुहोति उदिते पुनः पूर्ववदग्निहोत्रं हु
त्वा यजमानो भवतं नः समनसाविति उपतिष्ठते। अग्निहोत्रस्य पूर्वाहुतौ हुतायां यदि यजमानो म्रियेत आहवनीयस्य दक्षिणार्धे शी
ते भस्मन्युत एहुतिमग्नये कव्यवाहनाय स्वाहेति सर्वं निनयेत्। यत्राग्नीनां भस्मन्यग्निर्निहितस्तत्र तत्रैवोत्तरहुतिहोमः। प्रदानादि
वर्जमग्निहोत्रं समाप्य पितृमेधः कर्तव्यः। अग्निहोत्रे मक्रांते पूर्वाहुतेः पूर्वं यदि यजमानो म्रियेत तदा पूर्वाहुतिप्रभृति भृताग्निहो
त्रविधानेनाग्निहोत्रं समाप्य पितृमेधं कुर्यात्। यथाहिताग्निर्दुःस्वप्नं पश्येत् तदाज्यं संस्कृत्य यनद्रं भपामहे स्वाहेति द्वे स्रुवाहु
ती जुहुयात्। आहिताग्निर्दुःस्वप्नं पश्यन्नक्रंतो आर्त्विज्यं कृत्वाक्रतुं समाप्यानंतरं आहवनीये आभिगीर्भिरित्याहुतिं जुहुयात् जपेद्वा असौ एम॰
मपाज्याहिताग्निरत्यस्य कृत्वा वार्त्विज्यं कृत्वात्त आहवनीये आभिगीर्भिरित्याहुतिं जुहुयात् जपेद्वा असोम्यपत्र सोमयाननिमित्तमपांपुष्प १५

मसीत्येतदादि अनंतरिताः पितर इत्येतं कुर्यात्-आहिताग्निरसोमयाजी यः सोमेनयाजयति तस्यनैमित्तिकं परिभक्षकर्म सोमयाजिनो
पियाजयितृत्वनैमित्तिकमिति यत्तं समाप्यपरिभक्षकर्मप्रायश्चित्तं करिष्ये इति संकल्प्य-स्वकीयानग्नीन्विहृत्याज्यं संस्कृत्य सापापु
ष्यमित्यादिभिस्त्रिभिर्मंत्रैराहवनीये जुहोति-हुत्वाज्यशेषमन्यत्र निनीय च यं सोमेति तं शेषं भक्षयति-अथ दक्षिणाग्नौ देवेभ्यः पितृ
भ्यः स्वहिस्यादिभिस्त्रिभिर्मंत्रैः प्राचीनावीती जुहोति-दक्षिणाग्नेः पश्चाद्दक्षिणाग्रेषु दर्भेषु दधि इदावि-देवा सद्मह मादयध्वं मंत्रे
दीक्षिणाप्रागग्रेषु दध्नो निनयनं अनंतरिताः पितर इति-पितृणामेवोपस्थानं येषां दधि दत्तः अग्निविहरणादूर्ध्वं अग्निहोत्रहोमा
दूर्ध्वं यदि यजमानो श्रीपाद्रक्षये ह्यातचातस्मिन्नेवाग्नौ-यत्तेवयं पुरुषत्राय विष्ठ-यधाह तद्भसवदृस्येताभ्यां द्वे स्रुवाहुती जुहुयात्-स
मिधावा दध्याद्वा-अग्नौ वाजपेतः-उपसमिंधनादूर्ध्वं सायमहुतेऽग्निहोत्रे नाश्नीयादिति कात्यायनः इति वचनात्-आहिताग्नेर्व्रतलो
पात्प्रायतपतीष्टिः कर्तव्या-यस्य सुसस्य सतः सूर्योऽभिनिम्रोचति सोऽभिनिम्नुक्तः-यस्य सुसस्य सतः सूर्योऽदेति सोऽभ्युदितः-एतयोरपि
मनस्वती होमः प्रायश्चित्तं-यजमाने ग्रामांतरं गते पुत्रो तेवासी पत्नी वा यथाग्नीन् ग्रामाद्बहिर्न येयुस्तदाग्नयो लौकिकं कामं वेति-यजमा
नेऽग्निसमीपे स्थिते पत्न्या अपि ग्रामांतरगमनमाचार्येणोक्तं-पत्न्यां प्रोषितायां अपि यजमानेन वा पुत्रादिभिर्वाग्नीं ग्रामाद्बहिर्नयनेलौ
किकत्वं स्यात्-प्रोषिते यजमाने पत्न्यपि ग्रामवास्तुसीम्नो बहिर्गता होमकालात्पूर्वमनागता चेत्तदाग्नीनां लौकिकत्वं स्यात्-पत्नीव

श्रा॰दी॰ कृत्वेपि स्वामित्वाविशेषेण अन्यतरस्य ग्रामांतरं गतायामपि अग्नीनां त्वहिर्न यन्ये लौकिकत्वं स्यात् यजमानासन्निधौ वै कास्यामपि ग्रा
१६ मवास्तुसीम्नो बहिर्गतायां होमकालात्पूर्वमनागतायां अग्नीनां लौकिकत्वं भवेत् अथ यदि पत्नी यजमानश्चैव पत्नी चोभौ एव निष्क्राम
16 तः ग्रामांते ग्रामसीमांते वाऽवसीदतः अग्निहोत्रमेवलुप्येता विच्छिन्नमग्न्याधेयं कुर्वीतेति अस्यायमर्थः यजमानः पत्नी चाग्निसकाशा
द्बहिर्गत्वा ग्रामवास्तुसीम्नो बहिर्वसेयातां तदाग्नयो लौकिकाः स्युः एतेषु निमित्तेषु अग्न्याधेयमेव प्रायश्चित्तं यदो मावपि यामवास्तु
सीम्नोर्बहिर्गत्वा होमकालात्पूर्वमागतौ चेन्नाग्न्याधानमिति केचित् यजमानः पत्नी चोभौ ग्रामाद्बहिर्यावद्धोमकालं वसेयातां तदाग्न्या
धानं कर्तव्यं तथा च छंदोगपरिशिष्टे विहायाग्नीन्सभार्यश्चेत्सीमामुल्लंघ्य गच्छति होमकालात्यये तस्य पुनराधानमिष्यते इति एषप
क्षः शिष्टैरंगीकृतोनुष्ठीयते च तथा च जलपटले केवलं पत्न्याः सीम्नो बहिर्गमने उद्यापास्तमये पुनराधानमुक्तं तथा च भारद्वाजः
यदि पत्नी सीमांते आदित्योभिनिम्रोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिरिति इदमपि सत्त्रं प्रोषिते यजमाने पत्नी सीमातिक्रा
मणामिति केचिद्वदंति उभौ त्वेव निष्क्रामत इत्याचार्यवचनेन विहायाग्नीनिति छंदोगपरिशिष्टवचनेन च वैकार्यत्वाय भारद्वाजवच
नमुदाहृत्य यजमानपत्न्योः सहप्रवासं प्रकल्प्योक्तं यावत्यो ग्राममर्यादा नद्यश्च सीमा अतिक्रांतौ नदीश्च संतरंतौ अग्नीनरणीवाभान्वार राम॰
भेयातां तदा अंजस्याः समारूढा वाग्नयो लौकिका भवंति अपात्र विषये अन्यतरण्वारंभः कर्तव्यः अन्यतरण्वारंभाभावे आधानमेव १६

माघाश्रितं नदीलक्षणं च केचिद्वर्णयंति कूलद्वयांतरालं यत्र दीर्घाच्छेन चोच्यते किंतु तद्देशवर्त्तीयजलसंयोगो भवेत् अष्टौ धनुः
सहस्राणि न सम्प्रस्रवति यज्जलं नदीशब्दाभिधेयत्वं तस्य वेच्छंति सः एषः एकेन नामधेयेन ख्यात योजनगामि यत् उदकं तन्नदीश्रा
व्वाच्यमिसापरे जगुरिति। प्रवासादन्यत्रापि विनाग्निभिर्यदा पत्नी नदीमंबुधिगामिनीं अतिक्रामेत् तदाग्नीनां विनाशः स्यादिति
श्रुतिः नदीसंतरणे ग्रामयोः परस्परसंक्रमणे सर्वजाद्यंतसीम्नो वा पत्नीयजमानावग्नीनरणी वा चारभेयातां अनन्वारंभणे ग्नीनां॥
लौकिकत्वं स्यात् तथा च त्रिकांडी नदीसंतरणे ग्नीनां सीमातिक्रमणे तथा सर्वत्राद्यंतसीम्नो वा स्वामिस्पृष्टास्युरन्यथः प्रत्यक्षमरणि
द्वारमन्यथाग्निविनाशनं आत्मारोपणपक्षे च नान्वारंभणमिष्यते। प्रोषिते यजमाने ग्निहोत्रपिंडपितृयज्ञनित्येष्टयः कर्तव्याः यम्मुसो
मयागादीनि न कर्तव्यानि यजमानकर्तव्यता स्वन्यमुद्दिश्य त्यागमात्रकर्तव्यता पुरोडाशदर्विहोमादिकं अवसरप्राप्तमध्वर्युणा पत्नीसमी
पे कर्तव्यं पत्न्यां रजस्वलायां प्रसूतायां वा पूर्वमेव नियुक्तो ध्वर्युः कुर्यात् यजमाने प्रोषिते आग्रयणादि न कुर्यात् अग्निहोत्री गां त्री
हि स्तंबं वा यव स्तंबं वा दूरत्वादीन्यादपि त्वा तस्याः पयसाग्निहोत्रं जुहुयात् दूरत्वादि पक्षमाश्रयेत् नैमित्तिकजातेष्टिगृहदाहेष्ट्यादयो
यजमानागमनं न पर्यंतमुत्कृष्यंते याः काम्या याश्चिते ष्टयस्ताः सुपर्णाहुतिः कर्तव्या आधानादिकं न कुर्यात् यजमानकर्तव्यानि यानि मंत्रोक्ता
नि कर्माणि तेषां स्थाने मंत्रजपं कुर्यात् यजमानः अध्वर्युः कर्मकाले कर्माणि कुर्यात् विष्णुक्रमणोत्सर्पण वर्जं सर्वं कुर्यात् यजमानो वि

प्रा॰दी॰ व्युत्क्रमणोत्सर्पणे यत्र स्थितस्तत्र कुर्यात्॥ अदृष्टार्थानि कर्माणि लुप्यंते॥ दृष्टार्थानि कर्माणि कुर्यात्॥ इत मंत्रजपः कार्यः॥ अस्मिन्नर्थे त्रि
२७ कांडी वचनानि॥ पितृयज्ञाग्निहोत्रं च प्रकृतौ विधिं विनेतरत्॥ याविधि सोमयागादि याजमानक्रियान्विता॥ स्वामिनि प्रोषिते नास्ति साहका
र्यापनो मुनिः॥ याजमानक्रियास्त्र न्यंद विहोमादि किंच न॥ उद्देशत्यागमात्रेण याजमानेन संयुतं कुर्याद्वसरप्राप्तं सम्प्लविक पत्नीसमीप
तः॥ पत्न्यां रजस्वलायां वा प्रसूतायां तथापि वा॥ एवमेव नियुक्तः सन् ऋत्विक् कुर्याद्यथोचितं॥ अथाग्निहोत्रे निषेधः॥ पितृयज्ञ इति त्रयं॥
कर्तव्यं प्रोषिते पत्यौ यान्यत्स्वामिक्रियान्वितं प्रवसद्याहिताग्नौ पद्याग्रायणमुपागते॥ अग्निहोत्री ब्रीहिस्तंबमिति पक्षं समाश्रयेत्॥ नैमि
त्तिकं तु जातेष्टिगृहदाहेष्टिपूर्वकं॥ स्वाम्यागमनपर्यंतमुत्कृष्य संसशेषतः॥ प्रायश्चित्तेष्टिसंप्राप्तौ कुर्यात्पूर्णाहुतिं बुधः॥ अन्वाधेयादिकं प्रा
प्तं क्रमयानुगमादिना॥ स्वाम्यागमनपर्यंतमुत्कृष्टव्यमशेषतः॥ यावंति स्वामिकर्माणि मंत्रोक्तानीतराणि वा॥ तेषां निवृत्तिः सर्वेषां तत्स्था
ने जप एव हि॥ विव्युत्क्रमोत्सर्पमात्रे कर्तव्यं वचनाद्भवेत्॥ दृष्टिप्रयोजनार्थानि स्वामिकर्माणि यानि तु॥ तत्स्त्री मध्वर्युरन्यानि कुर्यान्मंत्राज
पेत्सतिः॥ अदृष्टार्थानि लुप्यंते जपेन्मंत्रांश्च तानपीति॥ इति प्रायश्चित्तप्रदीपे अग्निहोत्रप्रकरणं समाप्तं॥ अथ दर्शपूर्णमासप्रायश्चित्ता
नि वक्ष्यंते॥ तत्र प्रथमम् अनालंभुकाविषयं प्रायश्चित्तं॥ अन्वारंभणीयायां प्रक्रांतायां संकल्पानंतरम् अनालंभुकायाम् यजमानपत्नीं विहा एम॰
य प्रयोगं समापयेत्॥ केचिद् अग्न्यन्वाधानादूर्ध्वम् अनालंभुकायाम् यज्ञम् असमापयेदित्याहुः॥ दर्शपूर्णमासयोर्विशेषो वक्ष्यते॥ अर्धो वा एतस्य २७

पत्तस्स्मीपतन्नत्यादि पत्न्यादि पनालंभुकापामेतस्पपजमानस्पार्धं मीपतेऽभाग्योंसहकर्तव्यत्वात् अत्पेहनि पत्न्यनालंभुकाभवतीति
अत्पमहन्निति कर्मलक्ष्पते अत्राहैं कार्मणि संकल्पादिनामश्रीते अनालंभुकापां रजस्वलापां अपरध्यपजेत् अपरेऽर्धं नामकृतुआपारो
दाशिनकरणं सर्वं पौवपत्नेन पजते सांगेन पत्न्यांकर्तव्यं पत्न्याकर्तव्यं स्वपमेवकारेति तामिष्टोपक्रपेत तोऽस्पुरूत्वं वतुर्थेहनि कर्मार्थमु
पक्रमेत अमहमस्मीति ऋतुकालउपगमनमंत्रोवा अग्न्यन्वाधानप्रभृति अपरध्यपजेतेति संकल्पादूर्ध्वं अनालंभुकापां तांप
त्नींविहापैवाग्न्यन्वाधानादिकर्म कुर्पात् दर्शपूर्णमासपोः प्रथमेप्रपोगे संकल्पात् सर्वमनालंभुकापां विरम्पकालांतरे कुर्पात् संक
ल्पादूर्ध्वं कर्मारंभात् सर्वे अनालंभुकापामन्वाधानप्रभृति अपरध्यैवकुर्पात् द्वितीपादिप्रपोगेषु संकल्पात् सर्वे अनालंभुकापां सं
कल्पप्रभृति अपरध्यैवकुर्पात् एवं विकृतीष्टिष्वपि आग्रपण चातुर्मास्पेषु पशुबंधेषु च भवति अन्येत्वाहुः प्रथमे प्रपोगे संकल्पा
दूर्ध्वं अन्वाधानात् सर्वमनालंभुकापां विरम्पकालांतरे कुर्पात् अन्वाधानादूर्ध्वं चेद परध्यसमापपेत् द्वितीपादिप्रपोगे संकल्पात् सर्वम
नालंभुकापां विरम्पकालांतरे कुर्पात् संकल्पादूर्ध्वं अनालंभुकापामग्न्यन्वाधानप्रभृति अपरध्यैव समापपेत् एवं विकृतीष्टिपशुचा
तुर्मास्पेष्वपीति एतद्रूपीभाष्पोक्तमपि लिख्पते अत्पमहन्नामव्रतोपापनतादि सर्गपोर्मध्पउच्पते केचिद्व्रताहमहर्व्रमिति तेषां मते द
र्शपूर्णमासादीनां कर्मणां कालः पर्वादि अत्पमहः एषपक्षः प्रापेणानुष्ठीपते वृद्धैः केचित्संकल्पादारभ्पेतिवर्णपंति तास्मिन्नत्पेहनि पदि

प्रा·दी· पत्नी रजस्वला स्यात्तदा पत्नीकर्मवर्जं दर्शपूर्णमासादि कर्तव्यं· एवं दर्शपूर्णमासातिदेशप्राप्तेषु चातुर्मास्येषु अन्वाधानादूर्ध्वं रजस्व
१८ लायां मध्ये एव यागः कर्तव्यः· कर्मारंभात्पूर्वं चेत्कालांतरे यागः कर्तव्यः· पत्न्यामनालंभुकायां बहुपत्नीकस्यानालंभुकायाः कर्माणि
18 अन्यतमया कारयेत्· अन्यस्यामविद्यमानायां अनालंभुकायाः कर्म न स्यात्· पुत्रो ब्रह्मचारी गृहस्थो वा कुर्यात्· तन्मंत्रान्यजमानः स्थापत्तन आसी
नो जपेत्· प्रोषिते यजमाने तन्मंत्रान्पुत्रो जपेत्· प्रैषे पत्नीं संनह्येति पदद्वयलोपः· संनहनकाले योक्त्रं वेदेः पश्चाद्दग्रेस्तृणी प्रात्स्यस
वेक्षणाभावात् तेजोसीति गार्हपत्ये आज्याधिश्रयणं नास्ति· योक्त्रविमोचनकाले मंत्रेण योक्त्रमादद्यात्· अन्यत्सर्वं पुत्रः कुर्यात्· रोगादिना
पंग्वादिना कर्मण्यसमर्थायामपि एवमेव कुर्यात्· तथा च कात्यायनः प्रक्रांतमग्निहोत्रादि यत्किंचिद्रुतिवोदितं· आर्तवाभिप्लुतानां
ऽविहाय कुर्यात्तद्विजः स्वयं मा रंभणीयायां प्रक्रांते वैकृतेष्वपि· व्रतादूर्ध्वं तु दृष्टा कुर्यात्कार्यं न लोपयेत्· अन्वाहितेष्वग्निषु प
दित्रयोग्नयोनुगच्छेयुः गार्हपत्याद्यायतनेभ्यः क्रमेण भस्मनारणी संस्पर्शयेत्· प्रथममग्निसादिना मथित्वा गार्हपत्याद्यायतनेभ्यः क्रमे
ण भस्मनारणी संस्पर्शयेत्· प्रथममग्निसादिना मथित्वा गार्हपत्यायतने निधाय दक्षिणाग्निमाहवनीयं प्रणीयाज्यं संस्कृत्य होत्रादीना
मन्यतमेन प्रायश्चित्तं हुत्वा पुनराधाय व्याहृतीभिरुपतिष्ठेत्· यद्यासमारोपणात्क्रमेण पृथक्पृथक् मथित्वायतनेषु निधाय तत्र एक·
तत्रोक्तप्रायश्चित्ताहुतीर्हुत्वा पुनराधाय व्याहृतिभिरुपतिष्ठेत्· यद्याआवाहितगार्हपत्यस्योद्वापेत मंत्रेणारणीभस्मनां संस्पर्शे १८

तःप्रथममित्यादिनाममथित्वाद्दक्षिणाग्निमाहवनीयंचानुगम्यैवगार्हपत्यापतनेनिधायाज्यंसंस्कृसहोत्रादीनामग्नतमेनप्राप्याश्रितंतंहु
त्वागार्हपत्यंपुनरन्वाधायपञ्चाहुतीभिरुपतिष्ठेत अन्वाहितोदक्षिणाग्निरुद्वातश्चेद्गार्हपत्यात्तंप्रणीयदक्षिणाग्नौचतुर्होतारंगार्हप
त्येदध्यात्मकंहुत्वादक्षिणाग्निंपुनरन्वाधायपञ्चाहुतीभिरुपतिष्ठेत दक्षिणाग्नेर्भिन्नयोनित्वेप्रायश्चित्तंततआहत्यनिधायचतुर्हो
तारंहुत्वादक्षिणाग्निंपुनरन्वाधायपञ्चाहुतिभिरुपतिष्ठेत अन्वाहितआहवनीयउद्वातश्चेद्भस्मसमारोपणाद्यारतामथित्वाहव
नीयायतनेनिधायपञ्चहोतारंहुत्वाहवनीयेपुनरन्वाधायपञ्चाहुतिभिरुपतिष्ठेत पञ्चगोर्हपत्यादाहवनीयंप्रणीयेतःप्रथममित्या
दिमन्त्रत्रयंजप्त्वाहवनीयेपञ्चहोतारंगार्हपत्यादाहवनीयंप्रणीयेतःप्रथममित्यादिमन्त्रत्रयंजप्त्वाहवनीयेपञ्चहोतारंगार्हपत्ये
दध्यात्मकंहुत्वाहवनीयंपुनरन्वाधायपञ्चाहुतिभिरुपतिष्ठेत द्वयोःसहानुगमनेपितृत्रपूर्वोक्तंप्रायश्चित्तंकृत्वापुनरन्वाधायपञ्चा
हुतिभिरुपतिष्ठेत सभ्यावसथ्ययोर्नाशेआहवनीयात्प्रणीयतयोःसर्वान्होमान्कृत्वातत्तौमन्वाधायपञ्चाहुतिभिरुपतिष्ठेत भिन्नयोनि
त्वपक्षेप्रायश्चित्तंततआहत्यपूर्वोक्तंप्रायश्चित्तंकुर्यात् अजस्रपक्षेअन्वाहिताग्न्योःयत्रयोपघनुगच्छेपुर्गार्हपत्यावायतनेभ्योमन्त्रे
णभस्मनारणीत्कुमेणांसंस्पृश्येतःप्रथममित्यादिनापथ्यकृपथ्यंकृमथित्वायतनेषुनिधायाज्यंसंस्कृत्यगार्हपत्येसर्वान्होत्दंनदक्षिणाग्नौचतु
र्होतारंआहवनीयेपञ्चहोतारंचहुत्वासर्वान्पुनरन्वाधायपञ्चाहुतिभिरुपतिष्ठेत अन्वाहितोगार्हपत्यउद्वातश्चेद्भस्मसमारोपणाद्याद

प्रा·दी· तामथित्वागार्हपत्यायतने निधाय होत्रादीनामन्यतमेन प्रायश्चित्तं कृत्वा पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत अन्वाहिते गार्हपत्ये उद्धृते सति
१९ अजस्रबुध्या आहवनीयाग्निनाहरेत अन्वाहितो दक्षिणाग्निरुद्धातश्चेद्रुत्समारोपणाद्यावृत्तामथित्वा दक्षिणाग्न्यायतने निधाय चतु
17 र्होतारं कृत्वा पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत पक्षे दक्षिणाग्नेर्नाशे गार्हपत्यात्तं प्रणीय दक्षिणे चतुर्होतारं गार्हपत्ये दशात्मकं च कृ
त्वा पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत अन्वाहिते आहवनीये अनुगते मत्स्यसमारोपणाद्यावृत्तामथित्वा आहवनीये निधाय पंचहोतारं कृत्वा
पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत पक्षे आहवनीयनाशे गार्हपत्यात्तं प्रणीयाहवनीये पंचहोतारं गार्हपत्ये दशात्मकं च कृत्वा पुनरन्वा
धाय व्याहृतिभिरुपतिष्ठेत ह्रुपोर्ध्वपोः सहानुगमने तत्र तत्र पूर्वोक्तं प्रायश्चित्तं कृत्वा पुनः पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत अन्वाहिताग्नेः प्र
याणोपपतौ अग्निष्टेन सिपत्रपात्रादिसाधनानि निधाय दक्षिणमनड्वाहं पुत्वाजं संस्कृत्य तावन्मात्रोपयोगिमां पर्णमयां स्रुवां चातुर्ग्र
हीत्वा आहवनीये जुहोति अन्वारब्धे यजमाने तुभ्यं ता अंगिरस्तमेति हुत्वा स्रुचमाहवनीये प्रक्षिप्य सत्यमनड्वाहं पुत्वा अजस्रैः समा
रोप्य वा प्रयायात् अन्वाहिताग्नेः प्रयाणे दीक्षितस्य प्रयाणे उद्धरणपक्षे पित्र्याणां समारोपणं अजस्रपक्षे त्रयाणां समारोपणं सर्वदा·
अग्नीन्धु कष्ठे निधाय अरणीं वाभिलषिते देशं गत्वा पृथक्पृथक् प्रमथित्वा विहारं कल्पयित्वा तत्र तत्राग्नीन्निधाय मनस्वतीं हुत्वा प्रयो एम·
गप्रोषे समापयेत दक्षिणाग्नेर्भिन्नयोनित्वे पृथगरणीभ्यां समारोप्य मंथेत सान्नाय्यस्यान्वाधानदिवसे विधानात द्विषयं प्रायश्चित्तमु १९

च्यते॰ सान्नाय्यार्थं षट् गावः तासां पयोऽपाकृतावत्सा दोहनाय स्यागपदि धयेयुः तासां गवां पङ्क्तिं विस्पयो पि न लब्धस्यात्तदानीमेव षाषुदेवसपापवाप्ता
सापेयतेन॰ इदमपक्ष्यद इति संकल्पः अन्वाहितस्त्वात्रान्वाधानं॰ इध्माबर्हिः सन्नहसवायवेजुष्टं निर्वपामीति तंडुलान्निरुप्योषधधर्मेणावहननं
तं कृत्वा चरुस्थालीमधिश्रित्य संतंडुलैर्यवागूं पक्त्वा विश्राम्याभिघायासादयेध्माधानप्रभृति आज्यभागांतं हुत्वा वायवे नु ब्रूहि वायुं यजेति यवाग्वा
वायुं यजेत॰ वायो शतं हरिणामिति याज्यानुवाक्ये॰ वायोरहं रत्नभाग्भूयासं॰ स्विष्टकृदादि समाप्तं॰ अन्तारंभविसर्गौ यजमानस्य विधेते॰ पुनरालं
भवर्जं संतिष्ठते॰ तदानीमेवौषधीनां पयो दुग्ध्वा सायंदोहं संपाद्य मिश्रीकृत्वा सर्वासां वत्सानपाकृत्वोपोष्य श्वोभूते प्रातर्दोहाय सर्वासां पयो दो
हयित्वे हिं समापयेत॰ यदा सर्वासां पयसि कृतं सैषा तेषामिति येन केन विड्पायेनैव दधि पयो दोहयित्वा तस्मिन्नयो निनीय सुरक्षितं निधायोप
वसेत्। श्वोभूते आग्नेयमैन्द्रं चरुं निरुप्य वायवे यवागूवर्थं तंडुलान्निर्वपेत॰ तंडुलमस्कंदनां तं कृत्वा वायवे निरुप्याभिमृश्य प्रातर्दोहं कृत्वाग्नेय
येषणादि॰ सायंदोहं कुम्भ्यां रात्रौ स्थापितं पयः सान्नाय्यजलं निषिच्य। दोहधर्मेणं कुम्भीमधिश्रित्य ऽतेरणाग्नी स्थापकितं मतधीयतंडुलान्प्रक्षि
प्य यवागूं पचेत॰ सान्नाय्यप्रतिनिधित्वात्तन्नात्रौषधधर्मो यवागूः॰ विश्राम्याभिघार्य अलंकृत्य सह विर्भिः सह वेधामासाद्याग्नेयो यांशु याजाभ्यामिष्ट्वा इन्द्रा
यानु ब्रूहीत्युक्त्वा दधिस्थाने यवागूमवदायेन्द्रं महेन्द्रं वा यजेत॰ अथ गपुरोडाशस्कन्तो याभ्यामिन्द्रं महेन्द्रं पूर्वं स्थाप्य पृथक् यवाग्वा वायुं यजेत वायवे नु
ब्रूहि वायुं यजेति॰ वायो शतं हरिणामिति याज्यानुवाक्ये॰ वायोरहमिन्द्रियावी जेमानमिति वा॰ वायोः पृथक् यागपक्षे आवाहनकाले इन्द्र आवाहना

प्रा०दी० नंतरं वा पुमान्वाहयेत्· निगदेषु च तथैव निर्दिशेत्· एवमिष्टिं समाप्य तदानीमेवान्वाधानाद्युपक्रम्यासायंदोहं दोहयित्वोपोष्य श्वोदर्शात्सहा
२० मावास्येन यजेत· यद्यबद्धीनां गवां मध्ये पयः कांस्यधी पीततां दोहयेत् अधीतां गां न दुह्यात्· अधीता या गौः ययासासायंदोहं संपाद्य मिंदाहुतीहु
२० त्वा अदुग्धा तां वत्सान्पायकृत्स्य उपोष्य श्वःप्रातर्दोहं कृत्वामावास्येन यजेत प्रातर्दोहार्थं पयः पानेपि एकाम अधीतां दुग्धा प्रातर्दोहं कृत्वा मिंदा
हुतीहुत्वा यागं समापयेत्· सायंदोहविनाशेऽनुरात्रौ तदानीमेव पापीसेत्सपयपरिस्तीर्याग्नेर्गार्हपत्यस्य तृणानि संस्तीर्य तेष्वग्निहोत्रहव
णीमुपस्तंदाहु पात्री च सादयित्वाग्रस्तायां दक्षिणात उपवेश्य पवित्रं कृत्वाग्निहोत्रहवणीश्चर्ये चादाय हस्तायं दोहप्रतिनिधि पुरोडाशार्थमिंद्राय
महेंद्राय पञ्चहीहीन्निरुप्योपवसेत्· श्वोभूते कृतानन्तरार्थानयहायपात्रासादनादि कृत्वा एत्रौ निरुप्य श्रीहि हविश्चैवाग्रीमें इंद्रमाहेंद्रं वा निरुप्य प्रातर्दोहं
दोहयित्वा आग्नेयोपांशुयागाभ्यामिष्ट्वा इंद्रायानुब्रूहीत्युक्त्वा पुरोडाशादवदाय पश्चात् चावदाय दध्नस्थाने कृतं द्वितीयं पुरोडाशमवदायेंद्रं
महेंद्रं वेष्टिं समाप्य तदानीमेवान्वाधानाद्युपक्रम्य सायंदोहं दोहयित्वोपोष्य श्वोभूते दर्शसहामावास्येनापन्नोत यजेत· अथवा सायंदोह
नाशे प्रातर्दोहं द्वेधा कृत्वैकं भागमातंच्य सायंदोहस्थाने कुर्यात्· अपरं भागं पयःस्थाने कुर्यात्· मिंदाहुतीहुत्वाथाहुती श्रुहुत्वा यागं कु
र्यात्· प्रातर्दोहनाशेपि तस्य स्थाने ऐंद्रं माहेंद्रं वा पुरोडाशं कृत्वोपांशुयागांते कृत्वा इंद्राय महेंद्रायानुब्रूहीत्युक्त्वा प्राक्कृतं पुरोडाशमवदा एम०
य पश्चात् तत्स्थाने कृतं द्वितीयं पुरोडाशमवदाय दध्ना सह ... तदानीमेवान्वाधानाद्युपक्रम्य दोहं संपाद्य श्वोभूते श्वः तं संपाद्य यागं कुर्यात्· २०

सायंप्रातर्दोहद्वयपनायेऽग्ने इदं वा माहेन्द्रं वा पंचशराएवमोदनं निर्वपेत्‌ अग्निहोत्रहवण्याऽतिर्वापः शराएवेण वा अग्निहोत्रहवण्या निर्वाप
पक्षे चतुरो मुष्टीन्निरुप्याऽतिशिष्टावापकाले पंचशराएवपर्याप्तव्रीहीनावपेत्‌ पंचशराएवमिति पंचपुरुषभोजनपर्याप्तमोदनं पंचशरा
एवौदनस्य कर्मान्तरत्वे औषधधर्मा विधीयन्ते आग्नेयविकारत्वात्‌ पदार्दोहमयोः प्रतिनिधिस्तदानौषधधर्माः सहसांनाय्यत्वांओदनेप
सामान्यात्तैर्हविर्भिः सहपर्यग्निकरणं अभिघारणीयासह हविर्भिः सह वेद्यामासादनाग्नेयोपांशुयागाभ्यांमिष्ट्वा पुरोडाशमवदाय दोहद्व
यप्रतिनिधित्वाद्दोदनं चतुरवत्तमवदायेन्द्रं महेन्द्रं वा यजेत्‌ एवमिष्टिं समाप्य तदानीमेवाग्नीनन्वाधाय पसायंदोहयित्वा पयोभ्यां श्वोभूते
भ्यं तद्दधिभ्यांसहामावास्येन यजेत्‌ यथा सर्वत्र द्वौ हे पीनौ योऽपहारेवा मिंदाहुती व्याहृती श्च हुत्वा दोहयोः प्रतिनिधित्वेन श्रावाज्याद्दव
यापेष्टिं समाप्य तदानीमेवाग्नीनन्वाधाना द्युपक्रम्य दोहयित्वो पोषा श्वोभूते भ्यं तद्दधिभ्यां पुनः सह यजेत्‌ सान्नाय्ये श्रपमापोतायाद्दुग्धत्वा
ग्नेरन्यत्र पदि विष्यन्दे ऽदुदहुपरीत्य वल्मीकवपायां प्रजापतेर्नत्वदितितत्सपोवनिनीयभूमिसुपतिष्ठेतेति अन्यांदुग्ध्वा पुनः संनयेत्‌ सान्ना
य्यं यदि कीटविपन्नस्यात्‌ मध्यमेनोत्तमेन वा पलाशपर्णेन महीद्यौः पृथिवी च न इत्यृचांतः परिधि देशे निनीयान्यांदुग्ध्वा पुनर्यजेत्‌ सान्ना
य्यमभिहर्षं चेन्मित्रो जनानीति आहवनीये हुत्वान्यांदुग्ध्वा पुनः संनयेत्‌ यागकाले कीटाद्युपहतममेध्याद्युपहतं वा सान्नाय्यमप्सु प्रक्षिप्य
लौकिकं दध्यानीय प्यं तं च दोह मे त्राजस्वामिंदाहुती व्याहृती श्च हुत्वा तेनैव प्रचरेत्‌ सान्नाय्ये प्रतिगंधेन दुष्टे तदप्सु प्रक्षिप्य पुनः सं

प्रा॰दी॰ नपेत्‌। सान्नाय्यस्य पुरोडाशमप्रयाजात्स्कंदने यजमानः संत्वा सिंचामीति स्कंनस्योपरि जलं सिक्त्वाभिमंत्रयेत। अध्वर्युः भूर्जपेत्स्वाहोसादि
२१ नास्कन्नमनुमंत्र्य उग्निद्रिगणेन कृत्वा स्कन्नशेषेण प्रचरेत्‌। सर्वस्कंदने लौकिकं दधि पयो वानीय दोहमंत्राजस्वाद्र्गादिगणं कृत्वा तेन प्रचरे
21 त्‌। अमावास्यायामग्निहोत्रं हुत्वा सान्नाय्यातंचनार्थं अग्निहोत्रोच्छेषणं निदध्यात्‌। तत्प्रमादाद्यदि न स्यात्तदाग्निहोत्रं पुनर्हुत्वाग्निहोत्रोच्छे
षणेन सान्नाय्यमातंच्यात्‌। दर्शपूर्णमासादिषु मंत्रेणोपरि निहितं प्रस्तरं बर्हिरिध्मादि यद्यधो निपतेत्तद् ब्रह्मप्रतिष्ठामनसः इत्येतया पु
नः स्वस्थाने तत्प्रतिष्ठाप्यैतयैव स्रुवाहुतिं जुहुयात्‌। हुत्वा वा प्रतिष्ठापयेत्‌। हुत्वानंतरं कर्म कुर्यात्‌। अव्यवहितमेव कुर्यात्‌। एवमन्येष्वपि
नैमित्तिकेषु सर्वत्र व्यापन्नमतिक्रांतं कर्म पुरस्तादुपरिष्टाद्वा प्रायश्चित्तानंतरं कर्तव्यं। यथाश्राविताद्विषकृतेषु प्रायश्चित्तं कृत्वा पु
नः कर्तव्यानीति सामान्यमेतत्‌। अस्यापवादः। अतिक्रांतं कर्म नावृत्येत्। प्रमादात्सर्वमंगमकृत्वोत्तरस्मिंत्रंगे कृते पुनः पूर्वमंगं न कर्तव्यं
यद्यर्थलुप्तं भवति यदि प्रयोजनमस्त्यं भवति तत्र प्रायश्चित्तमेव। यथा प्रस्तरोच्छेदनमकृत्वाच्छिन्नशाखया वत्सापाकरणे कृते पुनः
प्रस्तरोच्छेदनं न कर्तव्यं प्रयोजनाभावात्‌। एवं लूनस्य लवनं स्वात्तस्य खननं अवहतस्यावहननं पिष्टस्य पेषणं दग्धस्य दहनमित्यादि
वचनात्‌ तेन कर्तव्यं क्वचिदर्थलोपाभावेपि वचनान्न क्रियते। यथा स्वरमाणाद्वोपसद्भिः प्रचरेत्पुनर्न कृताकृतमाद्रियेत इति वच एम॰
नात्‌। केचिदर्थलुप्तेष्वपि मंत्रोच्चारणमिच्छंति। छिन्नेत्यलूनेत्यपि पिष्टे सान्नाय्ये मातिकेत तथा यश्रामंत्राः प्रयोक्तव्या मंत्रा यज्ञार्थसाध २१

काद्दूति वचनात्· तथाच कात्यायनः स्वातलूनच्छिनावदत्तपिष्टदग्धदुग्धेषु पजुः क्रियासंभवादिति· सर्वत्राश्राश्रावितप्रसाश्रावितवषट्
कारणामवचनेन्यथावचनेमात्रादिहीनेऽतिरिक्तेन्यथावषट्कृते चाश्रावितमित्यवास्रुवाहुतिं जुहुयात्· सर्वत्रप्रोक्षणादिषुश्चा
पितव्यां देवतां विहाय पदेवतांतरोच्चारणोपह्वेदेवा अतिपाद्यानि इति स्रुवाहुतिं जुहुयात्· निर्वापकाले अभागिन्यै देवतायै यदि
निर्वपेद् भागिन्यै निरुप्तमिति पदा स्मरेत् तद्दैवहविर्विभज्य मुष्मै त्वेत्यभिमृश्य तद्देवसर्वं जुहुयात्· अमुष्मै स्वाहेति· वेद्यामासाद
नपर्यंतं पदा कदा वा स्मरेत्तदा निर्वापक्रमेणाभाग्विन्या पागोन्वायासच्छाने भवेत्· तदा होतापि अभागिन्या आवाहनं निर्वापक्रमेणा
कुर्यात्· तत्रापि पह्वेदेवा अतिपाद्यानीति स्रुवाहुतिं नु कुर्यात्· होतावाहनकाले भागिन्या देवतामपहायाभागिनीं यद्यावाहयेत्तत्र यह्वेदे
वा इति स्रुवाहुतिं कृत्वावाहनक्रमेण अभागिनीं देवतां क्र्यापास्य चतुर्गृहीतेनानुब्रूहीति ब यजेति यजेत्· होतापि तद्देवस्यायाज्यानुवा
क्याभ्यां यजेत्· उत्तमप्रयाजादिनिगमेष्वावाहनक्रमेणाभागिनीं देवतां निर्दिशेत्· भागिनीं देवतां पदा स्मरेत् तदोक्षापमनसावाहयेत्तस
र्वत्रप्रणीताप्रोक्षण्योदिविधुपात्तजलानां क्रियमाणानां स्नादितानां वा बिंदुपाते चमसादिस्रावे वा पोहिष्ठामयोभुव इति त्र्यचमुक्त्वांते
पात्रं प्रपित्वा तं तमश्नाप इति स्रुवाहुतिं जुहुयात्· दर्शपूर्णमासेषु तद्विकारेष्विष्टिषु प्रारब्धेषु समाप्तेषु मेध्यादिभिः स्पर्शो नाविर्भवति
चेऽदह्यमुऽस्यं वित्रमिति तितिस्त्रः स्रुवाहुतीर्जुहुयात्· यानि कर्माणि स्पर्शदर्शने विहितानि तानि वर्जयित्वेत्यर्थः· अथ वानुदिते सूर्ये

प्रा॰दी॰ पानि कर्माणि विहितानि तानि वर्जयित्वा अथ वा यत्र प्रायश्चित्तोक्तिः स्ति यस्याश्चिन्ने गाह्ये मनि स्रूपो नाविर्भवति सोऽपि बहुरूपमाल
२२ भेतेसादीनेत्त प्रायश्चित्तं भवति इह सर्वत्र ह विपर्यस्ते वितते सर्पा वंद्रमसोर्ग्रहणे पितृदर्पमित्यादिभिः स्रुवाहुतीर्जुहुयात् सर्व
22 त्र वितते पञ्चकर्मणि यजमानस्य ऋत्विजां वा स्वप्ने रेतो विसर्गः स्यादिमं मे वरुण तत्वा यामीति द्वे स्रुवाहुती हुत्वा गंधपुष्पोपहा
एदिभिः सूर्यमभ्यर्च्य पुनर्मामैत्विन्द्रियमिति तत्र चं जपेत् तच्चेन स्रुवाहुतीर्जुहुयात् समिधो भ्यादध्यात् बुद्धिपूर्वं रेतोत्सर्गे व्रा
तपतीष्टिं कुर्यात् पशुः स्वदारागमने व्रातपतीष्टिः प्रायश्चित्तं तत्र ह प्रायश्चित्तं स्य इति संकल्पः अग्नये व्रतपतये ष्टाकपालं पुरोडाशं
निर्वपेत् त्वमग्ने व्रतपा असि यदो वयमिति याज्यानुवाक्ये अग्ने र्व्रतपते ऽहमन्नादः आहिताग्नेर्यो ऽन्यं तरस्य सर्गे व्रतभृदिष्टिः
प्रायश्चित्तं निर्मृगारे ष्टिश्च इत्यापक्ष्यद इति संकल्पः अग्नये व्रतभृते ष्टाकपालं पुरोडाशं निर्वपेत् त्वमग्ने व्रतभृच्छुचिः ब्रतानि बि
भ्रद्व्रतपाः इति याज्यानुवाक्ये अग्नेर्व्रतभृतो ऽहमन्नादः सर्वत्र प्रायश्चित्ते हीनां पुनरालंभ जपो न विद्यते न्मृगारेष्टिः पुरस्ताद्वक्ष्यते
रेतोत्सर्गादिषु सर्व प्रायश्चित्तमपि कर्तव्यं सर्वत्र ह विर्देवता याज्यानुवाक्या हुतीनां हुताहुतमेषैषं तारिते विपर्यासे च त्वं नो अग्ने
स त्वं नो अग्न इत्येताभ्यां स्रुवाहुती जुहुयात् असमस्त्र स्यविस्तारः हुत स्यान्येषो नाशो ऽनग्नौ पतनं अहुतस्यान्येषो नाशः अवत्तस एम॰
नाशः तत्र त्वं नः स त्वं न इत्याहुती हुत्वा पुनः स्वस्थानाद वदाय यजेत् एकावदानाघकरणो यागास्वर्वेषा नेस जित्वं नः सत्वं न इत्याहु २२

तीहुत्वा पुनर्विसृष्टं तावदानमवदाय यजेत· एकावदानादिनायागे कृते त्वं नः स त्वं न इत्याहुती एवं न पुनर्यागः हविषामंतएयए
कावदानाधकरणे बहुहविष्ककर्मणि एकस्य हविषेऽअकरणं वा हविर्विपर्यासः देवतायाज्यानुवाक्यानां एकस्य विस्मरणे अं
तरायः विपर्यासस्तस्य समासः आहुतिम्रेषः आहुतेर्नाशः यथा अविज्ञातदेवताहुतिर्नष्पतीति· अपमाहुतेर्हुतम्रेषः आहुतेरहुतम्रे
षस्य· यावस्यपोगसमासिस्तावदाकृते रकरणं· तत्र सर्वत्र त्वं नो अग्ने स त्वं नो अग्न इति द्वे स्रुवाहुती जुहुयात· हविर्देवताधर्मणां या
ज्यानुवाक्यानां पार्वणाद्यंगहोमानां च व्यंसासे द्वे स्रुवाहुती जुहुयात· याज्यानुवाक्ययोः परस्परव्यत्यासे तथा तद्देवस्य नम याज्यया या
गे कृते पि त्वं नः स त्वं न इत्याहुती एवं न पुनर्यागः अंतरितामवंजयेत· भिन्नदेवस्य याज्यया यागे कृते त्वं नः स त्वं न इत्याहुती हुत्वा पुनर्या
गं न कुर्यात्· सर्वत्र हविषि छिन्ने यागे न षेच्छा नाद दवदाय पुनर्याकर्तव्यः हविष्यविद्यमाने हविरंतरं निरुप्य यागः कार्यः प्रक्रांतमा
ज्येन समाप्य पुनर्यागो वा· सर्वत्रावदाने अहुते हविषि दोषदर्शने अवत्तं हविरप्सु प्रीतमस्मनि वा प्रक्षिप्य त्वं नः स त्वं न इत्याहुती हुत्वा
पुनरयनाद्दवदाय यजेत· अवदानानंतरं पुरोडाशादौ दोषादर्शने वत्तेन हविषा प्रधानयागं कृत्वाऽवशेषमप्सु प्रक्षिप्य त्वं नः स त्वं न इति
द्वे स्रुवाहुती हुत्वाऽग्न्याज्यात् स्विष्टकृदादि कुर्यात्· न पुनर्यागः अवदानकाले पुरोडाशादौ केशादिदोषदर्शने दुष्टं हविरप्सु प्रक्षिप्य
शूर्पोदानादि हविरंतरं निरुप्य त्वं नः स त्वं न इति हुत्वा तेन यागं कुर्यात्· प्रधानहविषां परस्परविपर्यासे भिंदा हविर्गणाः त्वं न इति व

प्रा॰ दी॰ ह्वयोर्द्वयोः समुच्चयः प्रधानहविर्धर्मविपर्यासेत्वं नः सत्वं न इति द्वाभ्यां मिंदाहुती द्वयं वा प्रायश्चित्तं अंगहोमानामकरणे कर्मण्यसमाप्ते पुन
२३ र्यागः समाप्ते कर्मणि त्वं नः सत्वं न इत्याहुती एवं न पुनर्यागः प्रधानदेवतांतरणे पेक्षितं ततः प्राकृतस्मरणे त्वं नः सत्वं न इत्याहुती द्वे च मि
२३ दाहुती हुत्वा भूर्यादानादि पुनरुत्साधयागं कुर्यात् स्विष्टकृदूर्ध्वं स्मरणे तत्समाप्य पुनर्यागं कुर्यात् सर्वत्र प्रस्तरविधः ति परिधिबर्हिः
पविजप्रशाखापवित्रोपवेषवेदपरिस्तरणे ध्मादीनां छेदहोमे पथानेषु नाशे विनाशः जन्मं तद्रूपं कृत्वा तज्जातीयं तत्परिण्णाहं कृत्वा साद
यित्वा त्वमग्ने अयासि प्रजापते इत्येताभ्यां स्रुवाहुती जुहुयात् पवित्रनाशे मिंदाहुती गणो वा प्रायश्चित्तं प्रागुत्तमात्प्रयाजादाहवनीयायत
नादंगारो बहिः परिधि निर्गच्छेदंगारस्योपरि मा तपो मा यज्ञ इति मंत्रेण स्रुवमूलेन निधाय मुंगा हिंसीरिति वदेत् यदि पुरस्तात् बहिः परिधिं
गारो निर्गच्छेत् अध्वर्युं मा हिंसीर्यजमानं मा हिंसीरिति वदेत् यदि दक्षिणतः ब्रह्माणं यजमानं मा हिंसीरिति वदेत् यदि पश्चाद्धोतारं प
त्नीं यजमानमिति यद्युत्तरतः आग्नीध्रं मा हिंसीः पशून्मा हिंसीर्यजमानं मा हिंसीरिति वदेत् स्रुवमूलेनांगारमाहवनीये नु प्रहरेत् सहस्र
श्रृंगो वृषभो जातवेदा इति ब्राह्मणोक्तमिंदं प्रायश्चित्तं कृत्वै मंजीवेभ्य इति स्रुवाहुतिं जुहुयात् प्रयाजाद्यंगयज्ञानामकरणे इष्टेभ्यः स्वा
हेत्यादिभिरष्टौ स्रुवाहुतीर्जुहुयात् आहुतीश्च पिंडपितृयज्ञलोपे दर्शे हवनीये पाणिसंमर्शनात् सर्वे स्विष्टकृतः पर्वे वा समस्त होतारं चतुर्गृ एम॰
हं जुहुयात् अंगयज्ञानामकरणे प्रायश्चित्तमेव न पुनर्यागः प्रधानयज्ञविभ्रेषे प्रायश्चित्तं कृत्वा पुनर्यागः कर्तव्यः पक्षद्वयेत्पुत्रकायोन यजेत २३

स्त्रैधातवीयेनयजेतः त्रैधातवीयेष्ट्यापश्चादिति संकल्पः अथ संनहनकालेत्रयोविंशतिधेनवः निर्वापकालेदेवस्यत्वेत्याएऐंद्रा
विष्णुभ्यांयवानांचतुरोमुष्टीन्निर्वपति पुनर्देवस्यत्वेत्याएऐंद्राविष्णुभ्यामितिचतुरोमुष्टीन्व्रीहीणांनिर्वपति निर्वापकालेशूर्पद्वयेनिर्वा
पः नानाबीजधर्मेणकिंग्राहनिरस्तनादिकृत्वानिर्वपेत अवहननकालेव्रीहीनवहत्ययवानवहंतिनानाबीजधर्मेणप्रस्कंदनांतेकुर्यात
पेषणकालेव्रीहीन्पेषयित्वायवान्पिनष्टि कपालानामुपधानकालेद्वादशकपालान्युपधायप्रथमंव्रीहिपिष्टानांसंवपनंकृत्वामख
स्यशिरोऽसीत्यंतंकृत्वासंक्षालनमन्यस्मिन्पात्रेनिनीय तस्मामेनपिबोद्भ्यमापवपिष्टसंवपनादिकुर्यात पिष्टपात्रीद्वयंवा अधि
श्रयणकालेप्रथमंव्रीहिमयंपुरोडाशमधिश्रित्यत्वचंग्राहयित्वातस्योपरिततोज्यायांसंयवमयंपुरोडाशंनिधायत्वचंग्राहयित्वा
तस्योपरिततोपिष्टंहत्वाव्रीहिमयंपुरोडाशमधिश्रित्यत्वचंग्राहयित्वाउपायेनबहिर्लंभयित्वाज्यंनिरूप्यंयथापेषनिकृत्वापुरोडा
शंश्रपयति देवोवःसविताश्रपयतु अग्निर्वस्तनुवंमातिधागित्यादिमंत्रान्बहुवदूहेत संक्षालनद्वयंसंसृज्यअद्भ्योनिन
येत स्योनंवःव्रीहियवानांमेधाः सुमनस्यमानाइति उद्वासनकालेपुरोडाशपात्र्यंपुगपदेवोद्वासयेत सूर्यज्योतिर्वोविभातस्वर्मं
ऽर्ध्वत्वंच ऐंद्राविष्णुभ्यांजुष्टानभिघारयामि अत्रऊर्ध्वतांतिजनितारोमतीनां आदूर्ध्वः प्रथस्वलवेभुवनस्यगोपाः येवंआत्मानःप्रभु
षुप्रविष्टास्तानध्वंइति हीतासमिध्यमानानांसामिधेनीवांतरेणप्रयोजनमनेन। वीतिभिः ०प्रहोत्रेपूर्वमितिदेधाप्येद्धातिआ

प्रा॰दी॰ जुहोतेस्य पोध्रस्याग्रेत्री ते वाजिने ति परिदधाति॰ इंद्राविष्णुम्मामनुक्रहीति॰ मा मे ष्मा एवं विजिध्वं मावो हिंसिषं गाव॰ न॰ भरतमु

२४ ष्णूतेमनुषिं च नाव दानानि व॰ प्र॰ मोवो अक्कमामा हिंसिष्टेति पद वदानानिवो व॰ ष्ट आप्या॰ पुन॥ एकदा सर्वे पुरोडाशा अवत्ताय

२५ थास्युक्तथोपायेनावद्येत॰ इंद्राविष्णु यज॰ संवां कर्मणोस्य नुवाक्या॰ उभा जिग्यथुरिति याज्या॰ इंद्राविष्णोरहं देवयज्ययापात्र

हा॰ ऐंद्राग्र विष्वंतेग्वा॰ स्विष्टकृदादि अन्वाहार्यमासाद्य प्रतमानं हिरण्यं घृतान्नं वासो धेनुं च ददाति॰ अग्नये हिरण्यं॰ सोमाय

वासः॰ रुद्राय गामिति प्रतिग्रह मंत्राः॰ पुनरालंभवर्जं संतिष्ठते॰ एवं त्रैधातवीयेनेष्ट्वा संकल्पोत्सृष्ट यज्ञेन यजेत॰ यो यक्ष्यद्रसुक्त्वा

न्वाधानादि यत्किंचित्कर्म कृत्वा यदि न यजते स विम्रष्टेष्ट्या यजेत॰ इष्ट्या यक्ष्य इति संकल्प्यः॰ आग्नेयमष्टाकपालं पुरोडाशं

निर्वपते॰ ऐंद्रं पुरोडाशं निर्वपेत्॰ सौम्यं चरुं निर्वपेत्॰ तत्पुरोडाशाधिश्रयणात्सर्वं आग्नेयपुरोडाशैकदेशं सौम्यचरोः कतिपयतं

ड्, लान् ऐंद्रे पुरोडाशे तं स्रजेयेत॰ उभयोर्लौप्यं वा ऐंद्रे पुरोडाशे निमार्ष्टिः॰ अधिश्रयणादि समानं॰ यमत्र वन्निकाख्ये सोग्रेयस्य रं

द्रं वो विश्वतस्परीदं इंद्रं नरदूसैंद्रस्य॰ त्वं नः सोम या ते धामानीति सौम्यस्य॰ अग्नेरहमत्रादः॰ इंद्रस्याहमिंद्रियावी॰ सोमस्याहं प्रभ्रज

येति॰ पुनरालंभवर्जं संतिष्ठते॰ एवं विम्रष्टेष्टिं कृत्वा रब्धोत्सृष्ट यज्ञेन यजेत॰ सर्वत्र वितते यज्ञकर्मणि यजमानं प्रयागछेत्तय एम॰

तद्र्द्रम यामहे स्वस्तिदा विशस्पतिरिति प्रथमाहुतिः॰ सुबाहुती प्रजापति विश्वकर्मेति च सुवाहुतिं हुत्वा मयायगमे पुनर्यजेत॰ कारण २४

वदशब्दं मनःप्रयोगउपांशुः अक्षरव्यंजनानामनुपलब्धिर्ध्वानं तेषामुपलब्धिर्निगदः शब्दउपलब्धिमत्तउच्चैस्त्वमिदं कंठेम
ध्यं शिरसि तारं इति सर्वे वा वषट्स्थानानि कलिजां मंत्रोच्चारणकालेउपांशुप्रभृति वाचः स्थानानां मध्ये षेउदात्तादिस्वरमध्ये षेअक्ष
रपदमात्रामध्ये षेवा आभिर्गीर्भिरिति स्रुवाहुतिं जुहुयात् होतुर्हृद्रिन स्वरादौ मिंदाहिगणः प्रायश्चित्तं यजमानस्य यजमानोच्चारणका
लेस्वरादिमध्ये षेआभिर्गीर्भिरिति स्रुवाहुतिः प्रायश्चित्तं सर्वत्रेदं अत्रकर्तव्यमित्यनाज्ञातप्रायश्चित्ते षनाज्ञातं पुरुषसंमितदूति द्वे स्रु
वाहुती जुहुयात् सर्वत्रेध्माबर्हिरादीनां संभाराणां प्रयाजादीनामंगानां च न्यूने करणे वचनाद्दत्ते वर्धने च यस्मात्कत्रे इति स्रुवाहुतिं जुहुया
त् सर्वत्र हविषः स्कन्ने भिन्ने भग्ने नष्टे दुष्टे घुणे विपर्यासे उत्से केऽन्ने अतिरिक्ते वा यन्म आत्मनो मिंदाभूत् पुनरग्निरिति द्वे स्रुवाहुती जु
हुयात् सर्वत्र स्कंदनादौ तत्र तत्रोक्तप्रायश्चित्तस्यानेन समुच्चयः पुरोडाशप्रयाजीदाज्यस्कंदने यजमानः संत्वा हिंचामीति स्कन्नमनु
मनुमंत्रयेत अध्वर्युर्भूपतये स्वाहेत्यादिना स्कन्नमनुमंत्र्य यन्म आत्मनः पुनरग्निरिति द्वे स्रुवाहुती हुत्वा स्कन्नशेषेण प्रचरेत् प्रयाजाद
ध्वं मध्यात्प्राण्नापोयः स्कंदने अध्वर्युरेवस्कन्नमभिमंत्र्य मिंदाहुती हुत्वा स्कन्नशेषेण प्रचरेत् दर्शपूर्णमासादिषु हविर्यज्ञेषु विततेषु
सर्वत्रानादिष्टप्रायश्चित्ते षु अमस्तत्समस्तव्याहृतीर्जुहुयात् व्याहृतिप्रसंगात् कपालस्यनाशिरेकादौ प्रायश्चित्तं कपालस्थाने अश्वशफमा
त्रस्थानं परिकल्प्य रथचक्रचित्साकारेण कपालान्युपदध्यात् अश्वशफपात्रद्वे पात्कपालद्वासहस्थाप्याहुतिभिः स्रुवाहुतीर्जुहुया

प्रा॰दी॰ तत्र अष्टाकपालपुरोडाशेऽन्यूनातिरेकेण सप्तकपालानां नवकपालानां चोपधाने कृते व्याहृतिभिः स्रुवाहुतीर्हुत्वा हीने ष्टकपालमुपदध्यात् अतिरिक्तं कपाल
२५ मुत्सृजेत् कपालानामसंहतोपधाने व्याहृतयः प्रायश्चित्तं कपालानामूर्ध्वप्रमाणं अंगुलद्वयं अष्टाकपालोपधाने समचतुरस्राणि चत्वारि कपालानि वक्रत्रि
25 कोणानि चत्वारि कपालानि एकादशकपालेषु सप्तकपालानि चतुरस्राणि वक्रत्रिकोणानि चत्वारि द्वादशकपालेषु अष्टौ चतुरस्राणि वक्रत्रिकोणा
नि चत्वारि उक्तप्रमाणन्यूनातिरेकयोः व्याहृतयः प्रायश्चित्तं कपालोपधानकाले निहितांगारे पुरोडाशोपधानात्पूर्वमनुगते आत्वं संस्कृत्य मस्त
तीमाहपनीये कृत्वा पुनः कपालेष्वंगारान्निधाय प्रस्थहेत् पुरोडाशदाहे हविष्पथ्यग्ने हृद्यायस्वाहेति स्रुवाहुतिं जुहुयात् हविषो द्वे वापदे
स्वाहेति स्रुवाहुतिं जुहुयात् विदाघे निर्ऋत्यै स्वाहेति स्रुवा॰ हविषामतिदाहो मिंदादिगणः प्रायश्चित्तं अतिदाधहविषः प्रधानाहुतिमा
त्रसंभवे मिंदादिगणं हुत्वा अदाधप्रदेशाद्वदापमजेत् सिषक्लद्ववदानासंभवे प्रकृवाज्या पिष्टकृदादि कुर्यात् पदि सर्वमेव दग्धं स्याद्द
ग्धमप्सु प्रक्षिप्य मिंदाहुती हुत्वा श्रूर्पादानप्रभृतिहाविरंतरं निरूप्य यागं कुर्यात् क्षिप्रकर्तव्यतानिमित्तप्रासौ प्रवाज्येन प्रधानयागं कुर्यात्तत्र
त्र मिंदादिगणः प्रायश्चित्तं हुत्वा पुनर्यागं कुर्यात् बहुहविष्ककर्मण्येकस्य नाशे आज्येनेष्टिं समाप्य मिंदादिगणं हुत्वा पुनरपि तामेवेष्टिं कु
र्यात् चरौ श्रप्यमाणे प्रागुदक् प्रीतापाडुलिते अग्नये स्वाहेति स्रुवाहुतिः पदि दक्षिणतः यमाय स्वाहेति स्रुवाहुतिः पदि पश्चाद्वरुणाय स्वा एम॰
हेति स्रुवाहुतिः पद्युत्तरतः सोमाय स्वाहेति स्रुवाहुतिः पुनः सर्वत उत्सिक्ते सर्वा आहुतीर्जुहुयात् विदिक्षूत्सिक्तेः व्याहृतीर्जुहुयात् उत्सिक्ते २५

चरुमाज्येनाप्यायपति· आप्यायस्व समेतु ते पयांसीति सोम्यामिंदादुः इती चरुरूपान्· चर्वादीनां निःस्रावे दुर्गादिगणःप्रायश्चित्तंः हविषामुद्वासन॥
कालेपुरोडाशादीपतिते स्फुटिते उद्धर्तने संसर्पणे खंडिते स्खलनात एगमनेउताने द्रपो बहूनांवा विपर्यये विरंतरेणां तरिते चैषु निमि
त्तेषु व्याहृती हुत्वा आतमितोर्व्याहृती हुत्वा वर्धयुत्क एवं तरेणोदागात्वा पुनर्व्याहृती एतमितो हुत्वा वे घुत्क एवं तरेण व्याहृतीर्वदत्स्र विमो
तःपतनादिगुणविशिष्टपुरोडाशं पथापूर्वमुद्वासप्रात्रांतरेप्रभृतेन सर्पिषावसिच्य दारुपात्रां निधापवे घावहि तत्रैवासाय किमु
स्पतहीत्यादिमंत्रेणाभिमंत्र्य शूलपोगांवरं दत्वांतर्वै घासावपजेत· उद्धृतेतु कुलं हत्वा हेपिते न व्यतिमजा· भिन्ने संसर्पणेवापिपज
मानःप्रमीयते इति· पस्मामिष्टौ पुरोडाशो दत्तेनं तां समाप्य सुरभिमते ष्टापजेत· इष्टापक्षपद्धति संकल्पः अग्नये सुरभिमते ष्टाक
पालंपुरोडाशं निर्वपेत· गंधवतीभिःप्रोक्षणीभिःप्रोक्षणादिकुर्यात· गंधवंतऋत्विजःप्रचरेयुः अग्निर्होता निषसादायती पातस्थाध्वी
मकरिति पाज्यानुवाक्ये· अग्नेःसुरभिमतोहमन्नादः पुनरालंभवर्जं संतिष्ठते· पस्मामिष्टौ पुरोडाशस्सवेपनं केपनं तां समाप्य तंतुमती
ष्टिं कुर्यात· स्यापूर्वमेवोक्ता· पस्मामिष्टौ पुरोडाशस्सभेदनं तां समाप्याप्सुमतीष्टिं कुर्यात· इष्टापक्षपद्धतिसंकल्पः अग्नये आप्सुमते अष्टाकपा
लंनिर्वपेत· आप्सु हे विश्वतः आप्सुर्दा इति पाज्यानुवाक्ये· अग्नेराप्सुमतोहमन्नादः पुनरालंभवर्जं संतिष्ठते पस्मामिष्टौ संसर्पणं तां समा
प्याग्नी पजमन नक्षत्रेष्टिं वा तान्कुर्यात· अथवाभिन्ने संसर्पणे वा प्राजापत्यां प्रातदुग्ध लामि ष्टिं कुर्यात· योमस्त्योर्बिभीयात्ते एतामिष्टिंनि

प्राद्दी॰ ।र्वपेत्॰आपुष्टध्यर्थं प्रातरुच्छलेष्यापक्ष्य इति संकल्पः॰पात्रासादनकालेन वंचरुपात्रमासादयेत्॰उलूखलादीनां नप्रयोजनं॰अवहनना
२६ भावात् प्रणीताप्रणयनकाले घृतं प्रणयेत्॰घृतं प्रणेष्यामीति वदेत्॰कृष्णलप्रमाणानि प्राप्तं सुवर्णानि गुंजाकाराणि कृत्वा पात्रामोप्य देवसवि
28 सा दित्प्रजापतये जुष्टं निर्वपामीति कृष्णलान्निरुप्य प्रोक्षणानंतरं छद्मिमादायेसादिप्र्व्यासीसादि चरुस्थालीमधिश्रित्य तस्यां तिरः पवित्र
माज्यमानीय निरः पवित्रं चरुधर्मे पाकृष्णलानोपप्रपयेत्॰आज्यं निरुप्य पर्यग्निकरणं कृत्वा चरुधर्मेणोद्वास्य वेद्यामासादयति॰यागका
ले उपस्तरणाभिघारणं च न विद्यते॰चत्वारि कृष्णलानि प्रथमावदानं द्वितीयं तथैव॰एवमष्टौ कृष्णलानि चरुस्थाल्यां स्थितान्येन सहा
वद्येत्॰पंचावत्तिनामवदानत्रयं पक्ष्यापि स्याद् ॥ कृष्णलान्यवद्यति हिरण्यगर्भः समवर्तताग्रे प्रजापते न त्वदिति याज्यानुवाक्ये॰हवनकाले आ
ज्यमेव जुहोति॰न कृष्णलानि॰आज्यमेव प्राश्नंति॰कृष्णलानामेकेन सह स्रुजुहुयाद्॰प्रजापते रहं प्रजयाचेति च ला रि स्विष्टकृत्वे वघति पं
चावत्ति नत्वष्टौ॰आज्यमेव जुहुयात्॰अष्टाविडायै चत्वार्यवांतरेडायै आज्येन सह प्राशित्रस्यैकेन चतुर्धाकरणं॰चतुर्धाकरणकाले चरुपात्रां
शिष्टानि पात्रांतरे निधाय ब्रह्मणे प्रयच्छति॰अवत्तानि कृष्णलानि ब्रह्मणो हस्ते दत्तानि च सर्वाणि समं समं विभज्य गृह्णीरन्॰सामान्य दक्षिणां द
द्याद्वा॰न फलीकरणहोमः॰पुनरालंभवर्जं संतिष्ठते॰एवं प्रातरुच्छलेष्टिं समाप्यानंतरं पंचहविषामायुष्कामेष्टिं कुर्यात्॰आयुष्टध्यर्थं यक्ष्याप एम॰
क्ष्य इति संकल्पः॰आग्नेयमष्टाकपालं पुरोडाशं सौम्यं चरुं वारुणं दशकपालं पुरोडाशं सारस्वतं चरुं आग्नावैष्णवमेकादशकपालं पुरो २६

डोषं निर्वपेत्. आज्यावेक्षणकाले ध्वर्युरग्नेर्जिह्वासि. यंनवमेदिति द्वाभ्यामाज्यमवेक्षते. यंनवमेदित्यनेनवा. हविरुच्छसनानंतरं खादिरपात्रेप्र
वेतानिधायाभिघार्यहविर्भिः सहवेधामासादयति. आपृष्ठ आयुर्हो अग्नेहस्याग्नेयस्य आप्यायस्व संनदृति सोमस्य. अवतेहेडउदुत्तममितिवरु
णस्य. प्रणोदेव्यानोदिवइति सारस्वतस्य. अग्नाविष्णू अग्नाविष्णू इत्याग्नावैष्णवस्य. अग्नेरहमन्नादः सोमस्याहं सुरेताः वरुणस्याहं धर्मभाक्
सरस्वत्या अहं वाचमन्नाद्यं पुषेयं. अग्नाविष्ण्वोरहं वीर्यवान्भूयासं. पुरस्तात्स्विष्टकृतउपहोमान्जुहोति. अश्विनोः प्राणोसि तस्य ते दत्तां ययोः
प्राणोसि स्वाहा. हुत्वा संस्रावेण प्रवर्तमभिघारयति. एडसीति. इंद्रस्य प्राणोसीति हुत्वा विराडसीति प्रवर्तमभिघारयति. मित्रावरुणयोः प्राणोसि
तस्य ते दत्तां ययोः प्राणाहासीति हुत्वा. सम्राडसीति प्रवर्तमभिघारयति. विश्वेषां देवानां प्राणोसि तस्य ते ददतु येषां प्राणो हासीति हुत्वा स्वराडसीति प्र
वर्तमभिघारयति. खादिरं पात्रं प्रवर्तेन सहाग्रेणाहवनीयं नीत्वा दक्षिणवेदिश्रोण्यामासाद्य पात्रस्थमाज्यं यजमानमवेक्षयति. घृतस्य
धारामसृतस्य पन्थामिंद्रेण दत्तां प्रयतां मरुद्भिः त्वष्टा विष्णुः पर्यपश्यत्तत्वेद्गागमैरयतु रयिदिति दत्तं तेनः अथ त्विजो ब्रह्मणोहस्तमन्वारभ
यन्ति आसत्रा आहुः पवमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपारंशोर्वदर्यैणं देवस्त्वा सविता त्सृजतु जीवातवे जीवनस्यायै बृहद्र
थंतरयोस्त्वा स्तोमेन वीर्येण देवस्त्वा येयाजन्यासे वर्तन्याग्रयणस्य वीर्येण देवस्त्वा सविये अग्ने त्वा मात्रयोति त्रीन्. अथ यजमानो
हिरण्यद्वारेणाज्यं पिबति. पिबंतमध्वर्युरनुमंत्रयते इमममृतइति. यजमान आचम्य प्रवर्तमुद्धृत्य दक्षिणे कर्णे आबध्नी

प्रा॰दी॰ ते॰ आपृष्टेविघतोदधदिति॰ प्रवर्तमनु परिवर्तयति॰ आपुरसि विश्वासुरसि सर्वा पुरसि सर्वमापुर्जेषमिति॰ आपुरसीत्यादि सर्व

२१ मापुर्जेषमित्यनेन॰ अथ ब्रह्मा यजमानस्य हस्तं गृह्णाति॰ अग्निरायुष्मानिति षड्भिः॥ स्विष्टकृदादि समानं पुनरालंभवर्जं संतिष्ठते॰ एवमापु

ष्मामिष्टिं कुर्यात्॰ प्रयोगः पूर्वमेवोक्तः॰ आयुर्ष्यर्थं घृतहस्तकाजपं कुर्यात्॰ उद्वासनकालादन्यत्र पुरोडाशप्रपतनादौ दृगादिगणः प्रायश्चित्तं॰ शे

षडुष्टेन स्कंनेन वा हविषा अज्ञानात् प्रधानयागे हुते प्रणवव्याहृतीर्जुहुयात्॰ कर्मजानद्भिः क्लिष्टिभिः त्वरमाणे श्वयत्कर्म हुतं तत्र सर्व

त्र प्रणवव्याहृतीर्जुहुयात्॰ आज्यसोमव्यतिरिक्तहविषां यागे पुरस्तादुपरिष्टात्स्रुवाहुतीर्व्याहृतीर्जुहुयात्॰ अंज्यभागात्मकदीर्घमेषे अ

नादिष्टादि प्रायश्चित्तं प्रणवव्याहृतीर्जुहुयात्॰ ऋग्वेदविहितमेषे भूरिति गार्हपत्ये जुहुयात् जुकास्वकृदुद्दीतेन॰ यजुर्वेदविहितमे

षे तथा दक्षिणाग्नौ भुवइति जुहुयात्॰ सामवेदविहितमेषे तथा सुवरिति सकृद्दुहीतेनाहवनीये जुहुयात्॰ यदि सर्वतः सर्वा जुहुया

त्॰ अथर्वणः प्रयोगकाले मंत्राणामप्रतीतो आग्नेयैर्मंत्रैरैंद्रैः प्राजापत्यैर्वा कुर्यात्॰ व्याहृतिभिर्वा कुर्यात्॰ देवमंत्रत्वात्॰ यदा होता याज्यानुवाक्या

मुह्येत्तदा आग्नेयीभिरैंद्रीभिः प्राजापत्याभिर्वा यजेत्॰ यदा यजमानो याजमानेषु मुह्येत् वेघुस्क एवं तरेण व्याहृतीर्वदन्नविशेत्॰ व्याहृतिभिः

रेव संयाजमानं कुर्यात्॰ निष्क्रमणकाले व्याहृतीर्वदन्निष्क्रमेत्॰ सर्वा ऋचः सर्वाणि सामानि सर्वाणि यजूंषि यद्याहृतयः स्याचार्योक्तेः॰ अथह एम॰

विर्दोषान्व्याख्यास्यामः॰ ऐषेर्हविर्दुष्यति तान्वक्ष्यामः॰ अश्वदेहवर्तिनी नीलमक्षिकामवामंगवर्ति माशूतिका॰ लालावर्तो मत्कुणः चैलप्रिर्एवर्ति २१

नीप्लकाः मलपिंडकारी कीटः श्वमार्जारनकुलमर्कटाः प्रसिद्धाः ध्वांक्षः काकः आखुर्मूषकः तेषामन्येषां च पुरीषं मलः केशः प्रसिद्धः सिकः परिहित
पसनोच्चरूपदेपादः मत्तनखः छिन्ननखः कुनखो दुष्टनखः पुरुषः पूतिर्दुष्टगंधवद्द्रव्यं मुखजाः विप्रुषः स्वेदः प्रसिद्धः असृक् रुधिरं लेहोना
सिकाकफः अश्रु नयनांबु कासः श्लेष्मा क्षवथुः क्षुतं आर्द्रं वर्णं चेति एतैरुपहतं वसासृक्मसृक्मज्जामूत्रविट्कर्णविट्नखाः श्लेष्माश्रु
श्रु पूतिका स्वेदो द्वादश पौते नृणां मलाद्भूतिः एतैश्चोपहतं रजस्वलासूतिकाभ्यां स्पृष्टं दृष्टं अपपतनाभिशुनादृष्टं स्पृष्टं चमन्नूणाग्रेनवाभ्रूणाः
पंचपिपुर्पज्वागर्भिणीब्राह्मणो न पठति एतेषामन्यतमो यो हंति सकृणघ्नः तेन दृष्टं स्पृष्टं च कथयपात्रायाग्रामयंडालादिना दृष्टं स्पृष्टं च द्वजी
वरकोलोहकारश्वसूनाधिपः तक्षको वा गुरिरिति च ग्रामचंडालकाः स्पृष्टाजमेध्ये देशे यो वोस्कंनं पत्रमसूपतेनारीम्निपतेद्दृष्टं तेपि षाचंडाला
द्युवितं पत्रपत्रविषादिसंगतिः एवं कल्मषमभिविद्यामरमेध्याप्रकीर्तिताः एवं भूतामेध्यदेशेस्कंनं च एवं दुष्टहविरभ्युक्षितमसनिवाप्रक्षिप्य
मिंदाहुती च व्याहृतीश्च हुत्वा भूर्यो दानप्रभृति हविरंतरमुत्साद्य यजेत अप्सु क्षिप्त्वा प्रकर्तव्यता मासो आज्येन वा यजेत आज्यपक्षे मनखती
च प्रायश्चित्तं क्षुद्रकीटमक्षिकापिपीलिकावर्जं क्षुद्रकीटो घुणादिः माक्षिकापिपीलिके प्रसिद्धे एषु प्रमादात् हविषि पदति तेषु न दोषः स
र्वत्र क्षुद्रकीटमक्षिकापिपीलिकादीनामापंचभ्यः उच्छ्वासात्पुरस्तात् प्रजुहुयात् ऊर्ध्वं चेद्दुष्टमेवेति जैमिनिः दुष्टेन हविषा यागे कृते पश्चा
द्दोषदर्शने पुनर्यागो न कर्तव्यः तथा हि कात्यायनः दुष्टेन हविषा यागमितिवृत्ते पश्चाद्दोषसंवित्तिर्भवति तत्कृतमेवेति अदुष्टेन द्र

प्रा॰प्र॰ ध्येपापुनराद्ध्वन्ति रिति केचित्‌· अथ सर्वपत्रानां प्रायश्चित्तानि या ख्यास्यामः हविषां पत्र कुत्र वित स्वात्र छिन्न भिन्न मग्न नष्ट दुष्ट विपरीत क्ष
२८ रणास्कंदन स्त्राविस्त्पतित स्फुटितादि निमित्तेषु· अविज श्वाऽनः विडाल काक खर म्रग पशु पाक्षिसरीसृपादिषु अग्नीनामंतराक्रम्‌लिजामंत
२४ रावागतेषु छाद प्राग्‌हीतेन स्रुवं पूरयित्वा दुर्गामनस्वतीं महाव्याहृती श्चित्योजुहुयात्‌· अनसोंतरागमने पार्थिकादिष्वास हदुर्गादिगणसमु
च्चयः· सर्वत्र पयस्कस्य विक्रमे णो विपर्यासे मंत्रस्य मात्रा दिराहित्ये नोच्चारणे ब्राह्मणमात्रस्यार्थत्वे ऽर्थवर्योदर्भमात्रस्य परिग्रहे द्रूध्मा
त्र बर्हिमात्र परिधिमात्र पवित्रमात्र मंत्ररहित पवित्र परिग्रहे स्रुक्स्रुपारणी काष्ठाजिनमात्र परिग्रहे एषां मध्ये मंत्रवतां मंत्ररहिते जा
ति मात्र परिग्रहे आसादनाद्‌ परिप्रोक्षणात्‌ पूर्वकपालना शोधकानां पयस्कस्याचिन्मा शोधपत्रान्यं प्रणेत्त आहृस्य होतव्यमित्यादौ प्रणीतमा
त्र लौकिकाग्नेर्नाशे एषु निमित्तेषु अनादिष्ट प्रायश्चित्तेषु आज्यस्थाल्याः स्रुवेणोपहृत्य जुहोति· प्रजापतये स्वाहा· हिरण्यगर्भाय स्वाहा· ऋग्वे
यां पतये स्वाहा· अंगिरसांपतये स्वाहेति च न लोमहाव्याहृतीर्व्याहृतीश्च एवं द्वादश मंत्राः प्राजापत्यगणः· मंत्रहीने कर्मेणि मंत्रेणातिरिक्तो मंत्रे ऽर
धीते उच्चारणधर्मरहिते ऽब्राह्मणाधीते वा ऽरागत्ते कर्ममध्ये दुःखप्राप्तौ अनागते वषट्कारे ऽतीते च हविषि हुते हविष्यनग्नौ पतिते अ
ग्नौ प्रक्षिप्ते हस्य हविषो ऽग्नेरन्यत्र पतने होतुर्हिन स्वरेणाविगुणो कर्मणि हविषा मतिदाहे प्रधानयागार्थावदानद्वयातिरिक्तस्यातिदाहोपदा एम॰
भवति तदा प्रायश्चित्तं· पदिड़ाखिष्टहतोप्यवदानलाभः तदा नैतत्प्रायश्चित्तं· उक्तं च· पघवदानानि विंदति नात्र प्रायश्चित्तं कुर्वीतेति· पदाप २८

वेदाहः तदा भूर्पादानप्रभृति हविरंतरमुत्पाद्य घर्मिंदाकृती कृत्वा यजेत्· आज्येन प्रचरेदिति पूर्वमेवोक्तं· पत्निन्कर्मिंश्चिसात्रे मित्रेप्रोक्षणाद
परिउपधानात् सर्वं कपालनाशे मे देवाचतुष्पादादिकृत्विगवतीनामंतएंगते पवित्रसमाप्रोह विषांविपर्पासे ऋत्विजां वितते कर्मणि ऋत्विजां
परस्परं द्वैधीभावे च एषु निमित्तेषु मिंदादिगणेन प्रायश्चित्तं जुहुयात्· पमआत्मनः पुनरग्निरिति द्वे व्यस्तसमस्तव्याहृतयश्च ततस्तःप्रणवः प्रवि
ह्नितद्वृति तिसः तंतुंतन्वन्नुदध्यस्वाग्नेत्रपन्निपातंतनवदिति तिसः अन्वग्निमनोज्योतिः महाव्याहृतयश्च ततसःसहते अग्ने प्रजापते न त्वदिति एक
विंप्रंशति मंत्रोद्यमंदादिगणः पवित्रनाशे त्वमग्ने अयासि प्रजापतइति अनयोः मिंदादिगणेन समुच्चयः पात्रभेदे भूरपुमर्द्वसादे मिंदादि
गणेन समुच्चयो दुर्गादिगणेन व· प्रोक्षणप्रभृति उपधानात् सर्वं कपालेन ष्टे भिन्ने भिन्नं कपालं उत्कर उद्वस्यति· अभिन्नो घर्मो भौजीरदानुरि
ति· चतुर्गृहीतमाज्यमाहवनीये जुहोति· द्यूधो वेदिः प्रस्थेतद्वधामि स्वाहेति मिंदाज्यं हुत्वा प्राजापत्यं च गणं कृत्वान्यत्कपालमुपनिधायाभि
मृशति· घर्मो दिवानि तिः उपधानप्रभृति उद्वासनान्तं पदाकदाचाकपाले भिन्ने सति उत्कर उद्वासनादि मिंदादिगणहोमान्तं प्रायश्चित्तं कृ
त्वा स्वस्थानेन्यत्कपालं तन्मंत्रेधायाभिमृशति घर्मो देवानितिः उपधानप्रभृति पुरोडाशनिधानात् सर्वे उपहितं कपालं पदि नष्टेन्तदानीमे
ककपालनाशे ष्विंकुर्यात्· कपालनाशे ध्यायक्ष्पइति एकस्तः विहृतत्वान्नेष्वेवाग्निषु अश्मन्वाधानादि बर्हिःसंभरणान्तं कृत्वा ब्रह्मस्तंन
हनेततत्संविंशति धेस्रहः व्रतो पापनं नास्ति· वेदः प्राकृत एव परिभोजनी पंच अश्माभिष्टावद्यष्टार्थामंगानि निवर्तन्ते· द्यष्टार्थमपि विहृ

प्रा॰प्र॰ च निवर्त्तते। आवर्तं पात्रं पतत्पुनः ऽन्नपनाधासादयेत्। त्रीणि कपालानि एककपालोद्वासनार्थं पात्रं च सादयेत्। पाणिसंमर्जनपरिस्तरणब्रह्मोपवेश
२८ नप्रक्ष्यालतरणापवित्रकरणप्रतीप्रणपनानि कृतत्वान्न संति। अश्विभ्यां जुष्टं निर्वपामि द्यावापृथिवीभ्यां जुष्टं निर्वपामीति हविर्द्वयं निरुप्य पूर्व
२९ संस्कृतप्रोक्षणीनामर्धं प्रकृतेष्यर्थं पात्रांतरे निधायार्धेन निरुप्तं हविर्द्वयं सादितपात्राणि च प्रोक्ष्यावघातादि पिष्टप्रस्कंदनांतं कुर्यात्। पूर्वमु
पहितानां कपालानां ऽन्तरत आश्विनं द्विकपालमुपधाय द्यावापृथिव्यमेकं कपालमुपधाय संवपनादि पुरोडाशनिधानांतं कुर्यात्। पूर्वमाज्ये निरु
प्तेन निरुप्तस्यार्धं प्राकृतेष्यर्थं पात्रांतरे निधायार्धेन सह पर्यग्निकरणं कुर्यात्। अनिरुप्तं चेदाज्यं निर्वापादि कुर्यात्। आग्नेयमोनिनयेत्। कपाल
नाप्रोक्षिः पौर्णमास्यां चेद्वेदादानादि वेदिकरणं भवेत्। अमावास्यायां चेदुत्तरपरिग्राहादिः पत्नीसन्नहनं ध्रुवायामेवाज्यग्रहणं। एषा सददिति
ध्रुवायां आसन्नाभिमर्शनं। विष्णूनी स्थो वैष्णवे धामनी स्थः प्राजापत्ये इति ध्रुवामाज्यस्थालीं चाभिमंत्र्याश्विनं पुरोडाशमुद्वास्यैककपालं पात्रांतरउद्वा
स्याज्येन छादनीयावितः एवं कृत्वा वेधामासाद्यायेध्मात्समिधमित्यादि न समिधं परिधिं न वित्वेदे नोपवाजपति। अश्विनावग्न आवह द्यावापृथिवी
आवहेत्यादि आधारद्वयं नास्ति परिध्यग्निसंमार्जनं कृत्वा प्रवर आश्रावणं कृत्वा स्रुगादापनं ध्रुवाज्यात जुह्वां श्रुवं कृत्वेति चतुर्गृहीतमाज्यं गृहीयात्।
यजमानः पंचानां त्वेत्यादिभिः चतुर्भिः अनुमंत्रयेत्। पंच प्रयाजानिष्ट्वा प्रोवेण पुरोडाशद्वयमभिघारयति। नाज्यभागौ। हविर्भ्यां प्रचरति। अ एम॰
श्विभ्यामनुब्रूहि। अश्विनौ यजेति। अश्विनापवसेनिरूपेवां अविष्टं धीष्वश्विना न ऊत्याश्विनस्य। अश्विनोरहमिंद्रियावन्नादः। द्यावापृथिवीभ्या २९

मनुकहि द्यावापृथिवी प्रजेति द्यावा नः पृथिवी प्र पूर्वजे पितरा इति द्यावापृथिव्यस्य द्यावापृथिव्यो रहमुभयोर्लोकयोरर्ध्यास्तं· एककपालमपर्णा
वर्तं प्रतिष्ठितमखंडितं सर्वहुतं जुहुयात· स्विष्टकृदादि एककपालानां प्राशित्रषिद्धास्विष्टकृदादि कुर्यात· इडामार्जनानंतरं अग्निसंमा
र्जनं कुर्यात· अनूयाजा न संति वाजवतीभ्यां स्रुचौ व्यूह्य स्रुग्विमोकांतं कुर्यात पत्नीसंयाजा न संति दाक्षिणवह्निकौ होमौ हुत्वा योक्त्रं मंत्रे
णाविमुच्य बर्हिःसमज्य प्रहरेत· न समिष्टयजुर्होमः· विष्णुक्रमा लुप्यंते· एयमिष्टिं समाप्य चतुर्गृहीतमाज्यमाहवनीये जुहोतिद्यो
वेदिरिति· अन्यत्कपालं प्रक्षाल्य प्रोक्ष्य स्वच्छानेन मंत्रेणोपधाय घर्मो देवानित्यभिमंत्र्योत· एवं कपालनाशेष्टिं समाप्य प्रक्रांता॥
